॥ श्रीरस्तु ॥

श्री वेंकटरायसूरेः कृतयः,

श्रीमद्भिः धर्माधिकारि-

रायपाळ्य राघवेन्द्राचार्यैः संशोधिताः,

कविसहोदर तनयन

श्रीमता वेंकोबरायशर्म्मणा

मैसूरुवर्तिनि

श्री जयालय यन्त्रे अङ्कयित्वा प्रकाशिताः ॥

१९२०.

All Rights Reserved

अत्र मुद्रिताः ग्रन्थाः.

—*—

			पु.
१.	श्रीनिवासयात्रा नक्षत्रमाला दशकम्	...	५६
२.	श्रीनिवासमाला	....	४४
३.	वरदराजस्तवः	....	२१
४.	जयतीर्थाष्टकम्	....	४
५.	अभीष्टाष्टकम्	....	२

॥ श्रीवेदव्यासाय नमः ॥

* हरिः ओम् *

॥ श्रीनिवासयात्रा नक्षत्रमालादशक प्रारम्भः ॥

वेंकटाख्यो द्विजः कश्चित्काञ्चीमण्डलमध्यगः ।
वेंकटार्यसुतः श्रीमान् वराहार्यत्रशिष्यकः ॥ १ ॥
वेंकोबाचार्यमच्छिष्यो मध्वसिद्धान्तमार्गवित् ।
विष्णुभक्तिपरो नित्यं भारद्वाजकुलाग्रणीः ॥ २ ॥
गृहधर्मे स्थितः शान्तः सदाचारोऽतिथिप्रियः ।
उवास पडरण्याख्ये क्षेत्रे क्षीरनदीतटे ॥ ३ ॥

स कदाचिन्मनो दध्रे वेंकटाचलवासिनः ।
श्रीनिवासस्य यात्रार्थं पूर्वपुण्यप्रचोदितः ॥ ४ ॥
भक्त्या विशुद्धया चासौ स्नातोऽभ्यर्च्य हरिं गुरुम् ।
निर्ययौ भवनात्सद्भिरनुज्ञातः स्वकैर्वृतः ॥ ५ ॥
स हि यात्राविधानज्ञः तत्र तत्रोषितो निशि ।
वेंकटाद्रिगतं देवं प्राप्य सेवापरोऽभवत् ॥ ६ ॥
स कृत्वा बहुधा सेवां काले काले निषेव्य तम् ।
तस्योत्सवांश्च विविधान् वृद्धभक्तिर्बभूव ह ॥ ७ ॥
तस्य भक्त्या प्रपन्नस्य मध्वशिष्यस्य धीमतः ।
सेवाप्रसन्नो भगवान् यथावद्दर्शनं ददौ ॥ ८ ॥

तदाऽमौ वेंकटेशं नं दिव्यमङ्गलविग्रहम् ।
साष्टाङ्गं प्रणिपत्याग्रे हृष्टो वचनमब्रवीत् ॥ ९ ॥
अहो मे सौभाग्यं कलिमलमुषो दिव्यवपुषः
तवाङ्घ्रिद्वन्द्वेऽस्मिन् ननजनपुषि श्रीनरमुषि ।
मनस्त्वादौ पश्चान्नयनयुगलं मस्तकमथो
वचश्चेदं सर्वं कृतपदमभूद्वेंकटविभो ॥ १० ॥
नवेदं सौन्दर्यं फणिपफणिनीनामपि तथा
हृदो वा धातुस्ते चरितगणना नैव विषयः ।
धियो वा पद्मायाश्चरणरजसस्ते च विभवो
जनाः किं कर्तारस्त्वयि नतिमृते वेंकटविभो ॥ ११ ॥

भो वेंकटविभो स्वामिन् भो भक्तजनपोषण ।
भो दीनजनमन्दार भोभो भूरिगुणाकर ॥ १२ ॥
वार्यतां वाद्यघोषोऽयं क्षणमात्रं दयानिधे ।
श्रूयतां मम विज्ञाप्यं दासदासस्य मे प्रभो ॥ १३ ॥
देवदेव जगन्नाथ सर्वलोकेश्वरेश्वर ।
श्रीनिवास दयासिन्धो मानयस्व वचो मम ॥ १४ ॥
नारायण सदा भूमौ वैकुण्ठनिलयस्य ते ।
साधुसंरक्षणायैव वासः शेषाचलेऽत्र हि ॥ १५ ॥
सर्वं जगदिदं कृत्स्नं त्वत्त एव समुत्थितम् ।
संरक्ष्यते त्वयैवाद्य त्वय्येवान्ते विलीयते ॥ १६ ॥

त्वया व्याप्तमिदं सर्वं बहिरन्तश्च सर्वतः ।
सर्वदा साक्षिमात्रेण विष्णुना प्रभविष्णुना ॥ १७ ॥
नास्त्येवाविदितं किंचित्तस्य ते परमात्मनः ।
विज्ञाप्यते तदप्यद्य मया तत्त्वं क्षमस्व भोः ॥ १८ ॥
जन्म मे पश्चिमे देशे नन्दिक्षेत्रसमीपतः ।
वामोऽद्य दक्षिणे देशे रम्ये दुग्धनदीतटे ॥ १९ ॥
माता शेषाम्बिकानाम्नी वेंकटार्यः पिता मम ।
यत्प्रोक्षाशीर्भिरेवाहमाप्तवान् श्रेय ईदृशम् ॥ २० ॥
भारद्वाजकुलोद्भूत ऋक्छाखाध्ययनोचितः ।
दासो वेंकटशर्माऽहं देव त्वामभिवादये ॥ २१ ॥

स्वामिन्निवसनस्तस्य मम गेहे सुदुस्त्यजे ।
कारुण्यादेव ते जाता बुद्धिस्त्वद्दर्शनोत्सुका ॥ २२ ॥
ततो निर्गत्य सहसा त्वामेव मनसा स्मरन् ।
भक्त्युद्रेकाद्वदन् वाचा गोविन्देति पदे पदे ॥ २३ ॥
विलङ्घ्य विविधान् देशान् वनराजिविराजितान् ।
सरोवराणि रम्याणि पुराणि नगराणिच ॥ २४ ॥
आगत्यागत्य शनकैरद्राक्षमहमुन्नतम् ।
मेरुमन्दरसङ्काशं वेंकटाद्रिमिमं तव ॥ २५ ॥
यस्य दर्शनमात्रेण दूरतो यान्ति देहिनाम् ।
ब्रह्महत्यादिपापानि किं पुनः क्षुद्रदुर्ग्रहाः ॥ २६ ॥

यस्य सन्दर्शनादेव प्रमोदाश्रुपरिप्लुताः ।
दण्डवत्पतिता देहैश्छादयन्ति महीं जनाः ॥ २७ ॥
पुनरुत्थाय ते हृष्टा भक्त्या परवशीकृताः ।
रोदोन्तरंच रुन्धन्ति यान्तो गोविन्दगर्जितैः ॥ २८ ॥
साष्टांगं प्रणिपत्याहं वेंकटाद्रिमिमंपुनः ।
निर्गतोऽस्मि यथापूर्वं त्वामेव मनसा स्मरन् ॥ २९ ॥
ततः स्वर्णमुखीं प्राप्य स्नात्वा तत्र यथाविधि ।
तवाभिपूजनं कृत्वा नत्वा तीर्त्वा च तां नदीम् ॥ ३० ॥
ततोऽद्राक्षमहं रम्यं दिव्यं पद्मसरः शुभम् ।
पद्मैकैरवसम्पूर्णं नानाविहगमण्डितम् ॥ ३१ ॥

विचित्रतरसोपानं मध्यस्थमणिमण्टपम् ।
दुरापमल्पपुण्यानां निर्मलापं सुविस्तृतम् ॥ ३२ ॥
नारीनरवरैर्जुष्टं नानाजनपदागतैः ।
ब्राह्मणावसथैश्चित्रैः समन्तादुपशोभितम् ॥ ३३ ॥
मरुद्भिर्मन्दसञ्चारैः शैत्यसौरभ्यशालिभिः ।
भक्तचुद्रेककरैः पुण्यैर्लालिताश्रितमण्डलम् ॥ ३४ ॥
कार्तिकशुक्लपञ्चम्यामुत्सवान्ते दिवौकसाम् ।
देव्या चक्रेण च स्नानं यत्र मुख्यं नृणामपि ॥ ३५ ॥
दृष्ट्वा तदद्भुतं रम्यं सरोविपुलमुत्तमम् ।
त्वामेव मनसा ध्यायन् बद्धाञ्जलिपुटोऽभवम् ॥ ३६ ॥

ततः संकल्प्य विधिवत्सूक्तं जप्त्वाऽघमर्षणम् ।
स्नात्वा तत्र जले पुण्ये कृत्वा माध्याह्निकक्रियाम् ॥ ३७ ॥
गत्वा प्रदक्षिणेनैव तत्तीरे दृष्टवानहम् ।
तव देवीं रमानाथ विचित्रालयसंस्थिताम् ॥ ३८ ॥
पद्मासनगतां देवीं पद्मपत्रनिभेक्षणाम् ।
पद्मालङ्कृतहस्ताब्जां पद्मसुन्दरपदद्वयाम् ॥ ३९ ॥
दिव्यचन्दनलिप्ताङ्गीं दिव्यमालाविभूषिताम् ।
दिव्यश्वेताम्बरधरां दिव्यभूषणभूषिताम् ॥ ४० ॥
सर्वलोकैकजननीं सर्वसौभाग्यदायिनीम् ।
सर्वलोकैकसंसेव्यां सर्वलोकेश्वरेश्वरीम् ॥ ४१ ॥

नित्योत्सवां नित्यतृप्तां नित्यानन्दविनोदिनीम् ।
नित्यानित्यजगद्रूपां नित्यमुक्तां विमुक्तिदाम् ॥ ४२ ॥
सदा सुरनरस्त्रीभिः सेविताङ्घ्रिसरोरुहाम् ।
प्रसन्नवदनाम्भोजामप्सरोगणसेविताम् ॥ ४३ ॥
स्वकटाक्षसुधासारै राप्यायितजगत्त्रयाम् ।
त्वत्कटाक्षान् प्रतीक्षन्तीं पद्मां पद्मालयां शुभाम् ॥ ४४ ॥
देवदेवस्य ते पत्नीं दृष्ट्वा नत्वा मुहुर्मुहुः ।
स्तुत्वा ध्यात्वा च तां देवीं लब्ध्वाऽनुज्ञां ततः क्षणात् ॥ ४५ ॥
निर्गत्य निलयात्तस्मा त्प्रदक्षिणपथेन वै ।
पुरस्तादहमद्राक्षं पुरं श्रीपतिसंज्ञिकम् ॥ ४६ ॥

मन्यन्ते यत्र मनुजाः शक्रं कापुरवासिनम् ।
करीषवदहो यत्र गेहे गेहे ऽन्नराशयः ॥ ४७ ॥
तत्तदापणवीथीषु तत्तद्वस्तूनि पार्श्वयोः ।
अक्षयाण्येव दृश्यन्ते यत्र नित्यं जनाकुले ॥ ४८ ॥
तरङ्गा इव सिन्धूनां वस्त्रभङ्गास्तदापणे ।
यत्र रत्नापणे भान्ति मणयोऽग्निकणा इव ॥ ४९ ॥
दिक्पाला लोकपालाश्च सेवार्थं तव सत्पते ।
गिरेर्मूर्ध्नीव मूलेऽपि यत्र सन्ति कृतालयाः ॥ ५० ॥
पूजकाश्च सुराः सर्वे पूजासाधनसम्पदा ।
वसन्ति निधयो यत्र कुबेरवशवर्तिनः ॥ ५१ ॥

यत्र गोविन्दराजस्य वैशाखे सुमनोहरः ।
फाल्गुने रामचन्द्रस्य चैत्रेऽम्बाया महोत्सवः ॥ ९२ ॥
चैत्रे मासि पुनर्यत्र धारान्तररथोत्सवः ।
गोविन्दराजदम्पत्योः पृथग्डोलोत्सवस्तटे ॥ ९३ ॥
सप्रेमकलहः पूर्वमेकीभावस्तयोः पुनः ।
सन्धातृद्विजसन्मानं यत्रैतत्सर्वमद्भुतम् ॥ ९४ ॥
तस्य गोविन्दराजस्य चैत्रे राकानिशामुखे ।
यत्र स्वर्णमुखीकुल्यातीरडोलोत्सवः परः ॥ ९५ ॥
यदा मकरसंक्रान्तिस्तत्पूर्वदिवसोषसि ।
नवरात्रोत्सवान्तेऽस्मिन् जारचोरसुखावहे ॥ ९६ ॥

रामचन्द्रसरस्तीररहःक्रीडार्थनिर्गमः ।

यत्र गोविन्दराजस्य देव्योः श्रीभूस्वरूपयोः ॥ ५७ ॥

एवं नानोत्सवाकीर्णं नानाजनसमाकुलम् ।

नानालङ्कारसंयुक्तगृहचत्वरतोरणम् ॥ ५८ ॥

तत्प्रविश्य पुरं रम्यं कस्मिंश्चित् द्विजसद्मनि ।

मया नीता निशा सर्वा त्वत्कथाश्रवणादिभिः ॥ ५९ ॥

प्रातरुत्थाय तत्रत्यैस्तीर्थवासिभिरादृतः ।

आनीतः कापिलं तीर्थं स्नातोऽत्र विधिवत्स्वकैः ॥ ६० ॥

कृताह्निकस्ततो वेगात् त्वच्छैलपदवीं गतः ।

यात्राजनैर्निबिडितां गोविन्दरवनादिताम् ॥ ६१ ॥

ततो वेंकटशैलेन्द्रं दृष्टवानस्मि ते प्रभो ।

संयुक्तं मणिसोपानैः छायावृक्षैश्च पार्श्वगैः ॥ ६२ ॥

सोपानमार्गमाश्रित्य यस्याग्रमधिरोहति ।

जनसङ्घे गच्छतीव गङ्गा स्वर्गं पुनर्भुवः ॥ ६३ ॥

अञ्जनाद्रिं वृषाद्रिं च शेषाद्रिं यं विदुर्जनाः ।

पुराणज्ञाः पृथग्रूपं क्रमात्पूर्वयुगत्रये ॥ ६४ ॥

तमद्रिं प्रणिपत्योर्व्यामानन्दाश्रुपरिप्लुतः ।

बध्वा परिकरं सम्यक् सानुगः सह सज्जनैः ॥ ६५ ॥

सोपानपदवीं प्राप्तो गोविन्देति पदे पदे ।

वदन्नामानि चान्यानि ह्यर्थस्मरणपूर्वकम् ॥ ६६ ॥

तत्र तत्र कथां पुण्यां त्वदीयां रोमहर्षिणीम् ।
विश्रान्तिमण्टपे तिष्टन् श्रुत्वा निमिषमादरात् ॥ ६७ ॥
पुनःपुनः प्रयातोऽहं तीर्त्वा शिखरनिर्झरान् ।
विमानदर्शने जाते विवशोऽस्मि क्षणं मुदा ॥ ६८ ॥
साष्टाङ्गं प्रणिपत्योर्व्यां विमानवरमद्भुतम् ।
स्थानमेतत्प्रविष्टोऽस्मि ब्रह्मादिसुरसेवितम् ॥ ६९ ॥
उच्चैरुच्चरितैर्भक्तैः गोविन्दवरनिःस्वनैः ।
सिंहव्याघ्रवराहालि भीत्या यत्र विलीयते ॥ ७० ॥
परितः शिखराण्युच्चैरन्तर्भूमौ हि ते पुरी ।
तन्मध्ये चन्द्रसङ्काशो मणिप्राकार आलयः ॥ ७१ ॥

फुल्लपद्ममिवाभाति स्थानमेतन्नभोजुषाम् ।
पत्राणीवाद्रिशृङ्गाणि पुष्करिण्यो रसा इव ॥ ७२ ॥
विमानमत्र किञ्जल्कसन्निभं तव शोभते ।
भृङ्गा इव हि गायन्ति गन्धर्वाद्याः सदा दिवि ॥ ७३ ॥
भूवैकुण्ठमिदं नूनं नेच्छन्त्यत्रागता जनाः ।
तव सेवां विना किञ्चिदन्यत्संसारकश्मलम् ॥ ७४ ॥
वराहक्षेत्रमेवैतत् त्वया क्रान्तं समन्ततः ।
ततोऽग्रपूजां त्वत्क्लृप्तां नित्यं प्राप्नोति सोऽच्युत ॥ ७५ ॥
त्वया पञ्चामृतस्नानं नारिकेलफलार्पणम् ।
पूर्वसन्दर्शनं नॄणां वराहाय समर्पितम् ॥ ७६ ॥

स्थानमेतदनुप्राप्य स्वामिपुष्करिणीजले ।
स्नात्वा सञ्चिन्तयस्तत्र त्वामेव विधिवत्स्वकैः ॥ ७७ ॥
वराहदर्शनं लब्ध्वा लब्ध्वा पञ्चामृतं शुभम् ।
लब्ध्वाऽनुज्ञां हनुमतः प्रविष्टोऽस्म्यालयं तव ॥ ७८ ॥
अहो तवालयो ह्येष विमानवरशोभितः ।
सप्तावरणसंयुक्तः परिवारसुरैर्युतः ॥ ७९ ॥
शेषाद्रिशिखरश्रेणिफणामणिगभस्तिभिः ।
सुव्यक्तवैभवो रम्यः पुरमध्ये प्रतिष्ठितः ॥ ८० ॥
मणिसोपानसंयुक्तो निर्मृष्टादर्शसन्निभः ।
स्वामिपुष्करिणीसंज्ञं सरः स्फुरति यद्बहिः ॥ ८१ ॥

पुरं च शैलप्राकारं हर्म्यायुतविचित्रितम् ।
रथवाहनसञ्चारयोग्यरथ्यापणैर्युतम् ॥ ८२ ॥
नित्योत्सवं नित्यसुखं नित्यमङ्गलनिःस्वनम् ।
नित्यपूर्णं सुरवरैर्वैकुण्ठमिव सुन्दरम् ॥ ८३ ॥
आलये तव मेवार्थं विरजाऽनेकरूपिणी ।
स्वर्णकूपे बहिश्चैव सर्वतः मरनि स्वयम् ॥ ८४ ॥
सुप्रभातं च पठतां द्विजानां मधुरस्वनैः ।
प्रातस्तूर्यरवैश्चैव देवर्षिनुतिनिःस्वनैः ॥ ८५ ॥
योगनिद्राप्रबुद्धं त्वां तदैव शयनोत्थितम् ।
अनुज्ञितनिशावेषं निरीक्ष्य प्रणतोऽस्म्यहम् ॥ ८६ ॥

पुष्पाङ्क्या संवृतं सम्यगायतारुणलोचनम् ।
विस्रस्तमाल्याभरणं विश्वरूपं तवाद्भुतम् ॥ ८७ ॥
श्रीनिवास तवास्थानसेवाऽप्यत्यद्भुता मया ।
लब्धा निवेदितं तत्र तिलपिष्टं निषेवितम् ॥ ८८ ॥
तत्राध्यक्षाश्च पौराश्च परिवाराश्च सर्वशः ।
अगण्या इति गण्यन्ते धीमद्भिः किमुतापरैः ॥ ८९ ॥
सर्वरत्नधनादीनामादायव्ययलेखनम् ।
सर्वं संशोधितं तत्र पञ्चाङ्गश्रवणात्परम् ॥ ९० ॥
त्वया कृता तदा पूर्वदिनचर्याविचारणा ।
न राजसुलभा देव राज्ञः मर्वज्ञता कुतः ॥ ९१ ॥

वेदशास्त्रपुराणादिपारायणपरायणैः ।
ब्राह्मणैरभितो देव सेव्यसे त्वं सदा मुदा ॥ ९२ ॥
दण्डवत्पतितैर्भूमौ प्रसारितभुजद्वयैः ।
सेव्यसे पुण्डरीकाक्ष बाहुजैर्जयकाङ्क्षिभिः ॥ ९३ ॥
धनभारान् पुरो न्यस्य गजैरिव तवोरुजैः ।
सेव्यसे त्वं श्रियः कान्त प्रणमद्भिर्मुहुर्मुहुः ॥ ९४ ॥
आप्रसादादनुत्थानं सङ्कल्प्य पतितैर्भुवि ।
सेव्यसे शेषशैलेन्द्र शूद्रैः क्षुद्रफलाप्तये ॥ ९५ ॥
भक्तैरुच्चरितान्युच्चैः प्रदक्षिणपदे पदे ।
सर्वाणि तव नामानि गोविदान्तानि भान्ति हि ॥ ९६ ॥

गोविन्देत्येव हि सदा सर्ववाद्यस्वरूपिणी ।
घण्टा वदति नादेन प्रणवार्थप्रकाशिनी ॥ ९७ ॥
प्रातःसेवापराः पौराः समाप्य नियमं हरे ।
तव पूजां समालोक्य काले स्त्रीभिश्च बालकैः ॥ ९८ ॥
दध्योदनं च मुद्गान्न माद्यघण्टानिवेदितम् ।
भुक्त्वा कटाहतीर्थं च पीत्वा स्वैरं चरन्ति ते ॥ ९९ ॥
अहो सौख्यमहो सौख्यं गोविन्द तव सन्निधौ ।
विस्मृताशेषदुःखानां नृणां स्वच्छन्दचारिणाम् ॥ १०० ॥
ततोऽभिषेकसम्भारैः महाध्यक्षे समागते ।
प्रविश्यान्तर्गृहं सम्यक् सर्वमालोकितं मया ॥ १०१ ॥

देवैर्महर्षिभिश्चैव मन्त्रघोषैर्मनोहरैः ।
दिव्यवादित्रनिर्घोषै रभिषेकोऽद्भुतस्तव ॥ १०२ ॥
पूर्वाङ्गरागरेणूणामङ्गेभ्यो हरणं शनैः ।
ततः शुद्धोदकस्नानं स्वर्णकूपोद्धृतैर्जलैः ॥ १०३ ॥
जलहारिजनश्रेण्यां स्कन्धात् स्कन्धं प्रधावताम् ।
रौप्योदपूर्णकुम्भानां सङ्ख्या न ज्ञायते तदा ॥ १०४ ॥
ततो गोक्षीरधाराभिरभिषेकस्तवाद्भुतः ।
रुक्मपात्रप्रमुक्ताभिरिन्द्रनीलमणिद्युतेः ॥ १०५ ॥
सिताभ्रवरकस्तूरिकेसरान्वितचन्दनैः ।
सर्वाङ्गेषु विलेपस्ते स्नानं शुद्धोदकैः पुनः ॥ १०६ ॥

तदैव तीर्थग्रहणं स्वर्गपात्रेषु भूरिशः ।
शेषोदकस्य निक्षेपः कटाहे बहिरद्भुते ॥ १०७ ॥
यत्तीर्थं सर्वसुलभमाधिव्याधिविनाशनम् ।
कुष्ठादिशमनं श्रीदं द्रष्टुं स्प्रष्टुं निषेवितुम् ॥ १०८ ॥
ततोऽङ्गमार्जनं देव सम्यगापादमस्तकम् ।
दर्शनं लक्षणानां च तव देवादिदुर्लभम् ॥ १०९ ॥
ततोऽनुलेपनं गात्रे चन्दनादिरमैस्तव ।
कस्तूरीवरकर्पूरपटवासममर्पणम् ॥ ११० ॥
पीताम्बरयुगस्यापि तनौ धारणमद्भुतम् ।
कस्तूरीतिलकस्यापि लेखनं निटिले तव ॥ १११ ॥

नानाभरणविन्यासस्तत्तदङ्गे शनैः शनैः ।
रत्नकोटीरकटकाञ्चीनूपुरधारणम् ॥ ११२ ॥
तदैव कौस्तुभस्यान्ते तव वक्षसि दर्शनम् ।
श्रीनिवास श्रियो यद्वद्विद्युतोऽभ्रेऽर्कसन्निधौ ॥ ११३ ॥
नानाविधैः पुष्पमाल्यैरलङ्कारस्तवाद्भुतः ।
नक्षत्रगुच्छैरत्युच्चैर्निशेशनभसोर्यथा ॥ ११४ ॥
वनमालानिवेशश्च कण्ठे तव महाद्भुतः ।
इन्द्रचापोदयो यद्वदिन्द्रनीलाद्रिकन्दरे ॥ ११५ ॥
पूजनं तव गोविन्द पद्मादिकुसुमैस्ततः ।
धूपदीपप्रदानं च स्थलशुद्धिः पुरः क्षणात् ॥ ११६ ॥

भक्ष्यंभोज्यं च लेह्यं च चोष्यं चेति चतुर्विधम् ।
आनीतं पुरतः सर्वं तत्रैकैकमनेकधा ॥ ११७ ॥
पोलिकाऽऽनन्दगुलिकानानापूपप्रधानकम् ।
भक्ष्यं बहुविधं चान्नं सूपशाकसमन्वितम् ॥ ११८ ॥
पायसेन समायुक्तं पयोदध्याज्यसंयुतम् ।
युक्तं नानाविधैर्वन्य फलमूलजलार्द्रकैः ॥ ११९ ॥
नानाफलरसोपेतं नानाफलसमन्वितम् ।
रुक्मपानीयकलशैर्युक्तं ताम्बूलभाजनैः ॥ १२० ॥
सर्वं निवेदितं तुभ्यं सर्वसारभुजे तदा ।
घण्टागोविन्दनादेन सर्वेऽपि बधिरीकृताः ॥ १२१ ॥

वेधावेद विदुर्नान्ये त्वद्भोजनगतिं सुराः ।
नराः किमु बहि र्नृणां उपचारस्तु दृश्यते ॥ १२२ ॥
ततः क्षणेन तत्सर्वं नीत्वा बहिरभूत्किल ।
स्थलशुद्धिः पुरस्तात्ते पुनः पूज्योद्यमश्च सः ॥ १२३ ॥
अर्चनं धूपदानं च विविधार्तिसमर्पणम् ।
छत्रचामरसेवा च सर्ववाद्यरवैस्तव ॥ १२४ ॥
सर्वोपचारपूजां तां शुक्रवारेऽह्नि दृष्टवान् ।
कृपया तव गोविन्द प्रणीतो द्वाररक्षिभिः ॥ १२५ ॥
तदैवाज्ञाधरैर्देवा भूदेवाश्चापरे जनाः ।
प्रवेशिताः क्रमात्सर्वे सेवां कृत्वा विनिर्गताः ॥ १२६ ॥

दत्तोपधा जानपदाः सकुटुम्बाः प्रवेशिताः ।
दृष्ट्वा त्वां निर्ययुस्तीव्रं लब्धसन्मानमङ्गलाः ॥ १२७ ॥
वैत्रकृष्णाजिनधरैर्वारिता द्वाररक्षिभिः ।
ताडिताश्च विशन्तोऽन्ये त्वां दृष्ट्वा बहिरागताः ॥ १२८ ॥
अन्तर्गत्वाऽपि केचिच्चा मदृष्ट्वाऽन्योन्यमर्दिनाः ।
त्वयैव रक्षितप्राणाः बहिरायान्ति मद्भ्रशः ॥ १२९ ॥
पुनः प्रवेशितास्तेऽपि वेत्रपाणिभिरादरात् ।
तव सन्दर्शनं लब्ध्वा कृतकृत्या विनिर्गताः ॥ १३० ॥
अथ नैवेद्यशेषेण तोषितेषु रमादिषु ।
देवेषु तारतम्येन ऋषिसङ्घेषु च मानिते ॥ १३१ ॥

तीर्थैर्माल्यैश्च नैवेद्यै र्दिव्यश्रीपादचन्दनैः ।
द्विविधाभयहस्तैश्च पूज्यैः श्रीपादरेणुभिः ॥ १३२ ॥
आचार्यपुरुषाणां च साधूनामधिकारिणाम् ।
पौरजानपदनां च गजाश्वपशुपाक्षिणाम् ॥ १३३ ॥
सर्वेषामपि सत्कारस्तारतम्ययुतोऽपि सन् ।
तृप्तिदोभूत्परं नैतच्चित्रं त्वयि विमुक्तिदे ॥ १३४ ॥
अत्र चित्रविचाराढ्य पक्वान्नं पण्डितैरपि ।
फलवद्गृह्यते देव भुज्यते च त्वदर्पितम् ॥ १३५ ॥
तव नैवेद्यशेषेण ज्ञानिनोऽप्यत्र निर्मलाः ।
यजन्ति निर्विचारेण देवानपि पितॄनपि ॥ १३६ ॥

नयान्ति दूरदेशांश्च माषापूपान्मनोहरान् ।
तीर्थेन सह सर्वेऽपि पूजयन्ति च तैः स्वकान् ॥ १३७ ॥
तद्रात्रौ च पुन र्दीपदीपिकायुतकान्तिभिः ।
सुव्यक्तवैभवस्येश पूजारम्भस्तवाभवत् ॥ १३८ ॥
वेदवादित्रनिर्घोषः सेवाजनसमागमः ।
घण्टानिनादो देवस्य पूर्ववत्तव पूजनम् ॥ १३९ ॥
दापरलङ्कृतः सर्वो मणिप्राकारसंयुतः ।
आलयस्तव गोविन्दनक्षत्रगगनं यथा ॥ १४० ॥
सङ्गश्चौ वाणिकास्तत्र वीणामादाय सुस्वरम् ।
नव लीलां प्रगायन्ति नृत्यन्ति च मुहुर्मुहुः ॥ १४१ ॥

केचिदत्र विमानं ते नामकीर्तनतत्पराः ।
प्रदक्षिणं प्रकुर्वन्तो गर्जन्तीत्थं मुहुर्मुहुः ॥ १४२ ॥
श्रीनारायण जय गोविन्द
वैकुण्ठालय जय गोविन्द ।
लक्ष्मीनायक जय गोविन्द
ब्रह्मेशार्चित जय गोविन्द ॥ १४३ ॥
सद्गुणासिन्धो गोविन्द आश्रितबन्धो गोविन्द ।
दोषविदूर गोविन्द मत्स्यशरीर गोविन्द ॥ १४४ ॥
कच्छपरूप गोविन्द आदिवराह गोविन्द ।
श्रीनरसिंह गोविन्द वामनवेष गोविन्द ॥ १४५ ॥

भार्गवराम गोविन्द रावणशत्रो गोविन्द ।
गोकुलचन्द्र गोविन्द सीरिसहाय गोविन्द ॥ १४६ ॥
बुद्धशरीर गोविन्द म्लेंच्छकुठार गोविन्द ।
चिन्मयदेह गोविन्द मानुषलील गोविन्द ॥ १४७ ॥
वेङ्कटनाथ गोविन्द वृद्धिविनोद गोविन्द ।
सप्तगिरीश गोविन्द अद्भुतचर्य्य गोविन्द ॥ १४८ ॥
वेदभुवेद्य गोविन्द देववरेण्य गोविन्द ।
नारदगेय गोविन्द मारुतिसेव्य गोविन्द ॥ १४९ ॥
केशव विष्णो कृष्ण मुकुन्द ।
वारिजनाभ श्रीधररूप ॥ १५० ॥

तार्क्ष्यतुरङ्ग श्रीदशुभाङ्ग । ॥ ३० ॥
सज्जनसङ्गे त्वच्चरणाङ्ग ॥ १९१ ॥
दुर्जनभङ्गं सज्जनसङ्गम् ।
देहि सदा मे देववरेण्य ॥ १९२ ॥
कायविरक्तिं कर्मसु रक्तिम् ।
देहि सदा मे देववरेण्य ॥ १९३ ॥
पापविनाशं पुण्यसमृद्धिम् ।
देहि सदा मे देववरेण्य ॥ १९४ ॥
पादयुगे ते पावनदास्यम् ।
देहि सदा मे देववरेण्य ॥ १९५ ॥

निर्मलभक्तिं निश्चलबुद्धिम् ।
देहि सदा मे देववरेण्य ॥ १५६ ॥
निस्तुलसेवां देहि सदा मे ।
देव नमस्ते देव नमस्ते ॥ १५७ ॥
एवं स्तुवद्भिर्गायद्भिः प्रणमद्भिः पदे पदे ।
स्वदुक्तिविवैशैर्देव पूर्ण आसीत्तवालयः ॥ १५८ ॥
विचित्रगन्धमाल्याढ्याः मारुतिप्रतिमोरसः ।
ये दीपसेवां कुर्वन्ति नृत्यन्तोऽग्रे तवाद्भुतम् ॥ १५९ ॥
लालयन्तीव ते दासाः स्वकरेण हनूमतः ।
सज्वालवालमादाय चुम्बनालिङ्गनादिभिः ॥ १६० ॥

अहो वानरवेषाणां विष्णुदीक्षाविनोदिनाम् ।
देवानां नृत्यवैचित्र्यं वैकुण्ठेऽपि सुदुर्लभम् ॥ १६१ ॥
अहो कटाहे कर्पूरदीपज्वालोऽग्रतस्तव ।
न शाम्यति क्षणं वाऽपि दिवानक्तमखण्डितः ॥ १६२ ॥
अत्यद्भुतमिदं तेऽग्रे धनिका रजनीमुखे ।
दीपोत्सवं प्रकुर्वन्ति घृतधाराभिरम्बरैः ॥ १६३ ॥
आज्यानुरूपा धाराऽभूत् धारातुल्या हि दीपिका ।
दीपानुरूपा वर्तिश्च वर्तितुल्यं नवाम्बरम् ॥ १६४ ॥
आज्यं सङ्कल्पतस्तुल्यं सङ्कल्पः प्राप्यसम्पदा ।
पूर्वपुण्यानुरूपा सा तत्पुण्यं बहुधा नृणाम् ॥ १६५ ॥

प्रज्वाल्य दीपमत्युच्चैर्गोविन्देति मुहुर्मुहुः ।
गर्जतां नृत्यतां नृणां जगद्गोविन्दसादभूत् ॥ १६६ ॥
ततस्ते देव पूजान्ते शयनोत्सवमद्भुतम् ।
दृष्टवान् साधुभिः सार्कं शुल्कदैरपिदुर्लभम् ॥ १६७ ॥
मुक्तादामवितानाढ्ये कृष्णागुरुविधूपिते ।
मल्लिकामालिकाभिश्च रम्ये शयनमण्डपे ॥ १६८ ॥
स्वर्णशृङ्खलसम्बद्धरत्नपर्यङ्ककल्पिताम् ।
पयःफेननिभां शय्यां न्यस्तनानोपबर्हणाम् ॥ १६९ ॥
अग्रतो न्यस्तगोक्षीरफलताम्बूलभाजनाम् ।
स्फुरतां दीपधूपानां वृक्षैरभित आवृताम् ॥ १७० ॥

सर्वोपचारसम्पूर्णां रत्नचामरराजिताम् ।
सानन्दमहमद्राक्षं महालक्ष्म्यात्मिकां शुभाम् ॥ १७१ ॥
श्रीनिवास श्रिया सार्धं तामारोढुं दधन्मनः ।
तिरस्करिण्या छन्नोऽसि स्वर्णमय्या विना मुखम् ॥ १७२ ॥
नैवेद्यशेषगोक्षीरफलताम्बूलचन्दनैः ।
सत्कृताशेषसाधूनां नयनालिनिषेवितम् ॥ १७३ ॥
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ।
ज्वलत्कोटीरसंयुक्तं चलत्कुण्डलशोभितम् ॥ १७४ ॥
मन्दस्मितसुधासिक्तसत्कृपाऽपाङ्गवीक्षणैः ।
आश्रिताखिलसाधूनां प्रतिश्रुतमहाफलम् ॥ १७५ ॥

माणिक्यमुक्तापात्रान्तर्दीपनीराजितं तव ।
मुखाम्बुजं समालोक्य कृतकृत्योऽस्म्यहं प्रभो ॥ १७६ ॥
एवमेवान्यवारेष्वप्यभिषेकं विना तव ।
नित्योत्सवो भवत्यत्र सर्वदेवोपसेवितः ॥ १७७ ॥
यदा चाश्वयुजे मासे तुलामासे महोत्सवः ।
तव वेङ्कटशैलोऽयं तदा सम्पूर्यते जनैः ॥ १७८ ॥
पौरस्त्या दाक्षिणात्याश्च पाश्चात्याश्च मिता जनाः ।
अमिता औत्तराहास्तु तव देव महोत्सवे ॥ १७९ ॥
सकिञ्चना यथाकामं गजोष्ट्रहयवाहिनैः ।
धनैरत्नैरुपेत्य त्वामर्चयन्ति महोत्सवे ॥ १८० ॥

निष्किञ्चनाश्च ये भक्तास्त्वद्दर्शनमुत्सुकाः ।
पदे पदे प्रणामं ते कुर्वन्तो यान्ति तेऽन्तिकम् ॥ १८१ ॥
आधिव्याधिविमुक्ता ये प्रार्थनाभिस्तवाच्युत ।
उपदीकृतसर्वस्वास्ते तस्थुर्देहमात्रतः ॥ १८२ ॥
पादकीला हस्तकीला मुखकीलाश्च ये जनाः ।
आगत्य पुरतः सर्वे श्लथकीला बभुर्हि ते । ॥ १८३ ॥
विस्मृतप्रार्थना ये तु श्रीमदात्प्राप्तसङ्कटाः ।
स्मरन्तो द्विगुणं कृत्वा मुच्यन्ते तेऽत्र सङ्कटात् ॥ १८४ ॥
किञ्चिज्ज्ञो वा बहुज्ञो वा प्राज्ञो वा ऽज्ञोऽपि वा नरः ।
अपराधधनं किञ्चिद्दत्त्वैवान्तर्विशत्यहो ॥ १८५ ॥

महाकटाहे निक्षिप्तं किञ्चित्किञ्चिदपादृशम् ।
धनं दिनस्य द्विस्त्रिर्वा पात्रं तत्पूरयत्यहो ॥ १८६ ॥
कामितार्थप्रदं त्वां तु बहुकामा बहुप्रजाः ।
सेवां बहुविधां नित्यं कुर्वन्तीश तवान्तिके ॥ १८७ ॥
सेवावैचित्र्यमेवैव बोद्धव्यं तव सन्निधौ ।
एवं न ज्ञायते सम्यक् ग्रन्थेषु सुधियामपि ॥ १८८ ॥
दिवं स्पृशति गोविन्द उद्भूते गरुडध्वजे ।
महोत्सवे नौरिवाभूदालयस्ते जनार्णवे ॥ १८९ ॥
वीथयो विपुला रम्याः द्रष्टारोऽनिमिषा दिवि ।
वाहनानि विचित्राणीहोत्सवस्ते महाद्भुतः ॥ १९० ॥

तार्क्ष्यैरात्मवस्त्रैकोऽपि रौप्यदण्डधराः पुरः ।
तदर्थमर्थदा भान्ति बहवो धर्मदीक्षिताः ॥ १९१ ॥
रथे मणिविमानं ते परिक्रामन्ति खेचराः ।
मेरुं प्रदक्षिणं यान्ति रविः किमिति विस्मिताः ॥ १९२ ॥
हर्म्याग्राणि समारुह्य गिरिशृङ्गाणि चादरात् ।
महोत्सवगतं त्वां तु सुखं पश्यन्ति मानवाः ॥ १९३ ॥
निवेदितान्नभक्ष्याणां राशयो बहुधा पुरः ।
महोत्सवे तवेक्ष्यन्ते न सन्ति निमिषात्पुनः ॥ १९४ ॥
विजने गिरिदुर्गेऽस्मिन्विलीनमपि कामदम् ।
श्रयन्ति त्वां प्रजाः सर्वाः गुडं यद्वत्पिपीलिकाः ॥ १९५ ॥

ध्वजावरोहणं वीक्ष्य यान्त्यः स्वस्वपुरं प्रजाः ।
भारभूतं परित्यज्य सारभूतं नयान्ति हि ॥ १९६ ॥
धनाभरणरत्नाद्यमाद्यं तत्र प्रकीर्तितम् ।
आयुरारोग्यतेजःश्री जयश्रद्धाद्यमुत्तरम् ॥ १९७ ॥
सर्वस्वं मूर्धजं चैव दत्वा यस्तु तवान्तिकात् ।
दण्डी मुण्डी विनिर्याति सोऽयं ब्रह्माण्डतस्करः ॥ १९८ ॥
धृतोर्ध्वपुंड्राः सर्वाङ्गे तुलस्यब्जाक्षमालिनः ।
घण्टानादेन निर्यान्ति शूद्राः शुभ्राब्जपाणयः ॥ १९९ ॥
तीर्थप्रसादभारेण भक्तिभारेण चानताः ।
त्वदर्पितेन्द्रियग्रामा यान्ति विप्राः शनैःशनैः ॥ २०० ॥

यथाविभवमन्येऽपि प्रयान्त्यान्दोलिकादिभिः ।
क्षीणभारैः परिजनैः पुरतः पृष्ठतो वृताः ॥ २०१ ॥
चैत्रादौ कटकादौ च द्वादश्यां च धनुस्थिते ।
पुण्यशीलाः प्रपश्यन्ति ह्यास्थानोत्सवमद्भुतम् ॥ २०२ ॥
उत्सवत्रितयेऽप्यस्मिन् सवज्रकवचं तव ।
विस्मापयति गोविन्द वपुर्वैकुण्ठगानपि ॥ २०३ ॥
आदर्शमण्टपे चित्रे नद्धज्रकवचोज्ज्वलम् ।
रूपं तव सदा भातु श्रीश मे हृदयाम्बुजे ॥ २०४ ॥
कटकादौ किलास्थाने प्रवृद्धे तु तवोत्सवे ।
जनकोलाहलेनेश पूरिते च दिगन्तरे ॥ २०५ ॥

कुबेरेणोत्तमर्णेन स्वस्मै देयधनं प्रति ।
स्वर्णपाशः पुरो नीतः सस्वर्णाङ्गुलिमर्दनः ॥ २०६ ॥
धनं ययाचे भगवान् निष्किञ्चन इवापरान् ।
दत्ते तु तैर्ऋणान्मुक्तः ऋणं कस्य न बाधकम् ॥ २०७ ॥
कदन्नं सेवते नित्य मृणमीत्या प्रभुः स्वयम् ।
तथाऽपि न ऋणान्मुक्तो देवो विश्वकुटुम्बकः ॥ २०८ ॥
कदन्नसेवनाद्दीनः पलायनपरोऽभवत् ।
कन्दमूलफलाहारो हनूमांश्च तदन्तिकात् ॥२०९ ॥
निर्बध्य निगलेनाग्रे पलायनपरं हरिम् ।
सेव्येनेऽनेन म विभुः मेत्राधर्मोऽनिमङ्कटः ॥ २१० ॥

वस्त्रमामरणं वाऽपि धर्तुं दत्तं यदि स्वकैः ।
पृथक् तन्मौल्यदानेन विना न स्पृशति प्रभुः ॥ २११ ॥
अर्थदानं विना सेवां नाददाति कदाचन ।
कीदृशीमपि कस्यापि ह्यृणभारानतो हरिः ॥ २१२ ॥
ग्रीष्मकाले यदा वायुः शेषाद्रिशिखरान्तरात् ।
फूत्कार इव निर्याति शिरोबाधा तदा हरेः ॥ २१३ ॥
बहिर्नायाति तत्काले शेषेऽन्तः सर्वदा विभुः ।
तेन कस्तूरिकापङ्कलेपः शिरसि धार्यते ॥ २१४ ॥
शीतकाले तु संप्राप्ते श्रीनिवासः सदा निशि ।
घृतप्लुतं मरीच्यन्नं मितं भुङ्क्ते महाप्रभुः ॥ २१५ ॥

वराहस्थानमहर न्नृसिंहकुलदैवतान् ।

न लालयति लक्ष्मीशः स्वजनानेव रक्षति ॥ २१६ ॥

इत्यादिजनवाक्येन पारतन्त्र्यमपूर्णता ।

अशक्तिश्चाप्यमूयादि दृश्यते ऽनघ यत्त्वयि ॥ २१७ ॥

तत्सर्वं मोहनायैव नररूपसुरद्विषाम् ।

नान्यथा विदुषामेतन्मर्त्यलीलाप्रदर्शनम् ॥ २१८ ॥

द्रव्यमाश्रित्य तिष्ठन्ति सर्वपापानि देहिनाम् ।

तन्नाशे श्रेयसां प्राप्तिरिति द्रव्याकर्षणम् ॥ २१९ ॥

वातशीतलदुर्गेऽस्मिन् स्वैनेद्येकभोजिनः ।

सन्तु मे नीलना मक्षा इति ते पथ्यभोजनम् ॥ २२० ॥

सर्वकर्माणि ते भूमन् भक्तानां संग्रहायच ।
चिन्तनाय विनोदाय पालनाय जयन्ति हि ॥ २२१ ॥
भक्तानां सुलभोऽसि त्वं भक्तैरेव प्रगीयसे ।
भक्तेष्टदाननिपुणो भक्तबन्धुर्दयानिधिः ॥ २२२ ॥
अहो गुरुप्रमादो मे बलवान् सर्वकामदम् ।
श्रीनिवासाव्हयं य त्वां कल्पवृक्षमदर्शयत् ॥ २२३ ॥
धन्योऽस्म्यनुगृहीतोऽस्मि मद्गिराच्चरितं मम ।
सर्वं सफलमद्य त्वां पश्याम्यात्मानमद्वयम् ॥ २२४ ॥
संसारसागरावर्तगर्तसन्भ्रान्तचेतसः ।
ममावलम्बनायाद्य लब्धं तव पदाम्बुजम् ॥ २२५ ॥

पदद्वयमिदं देव हंसनूपुरशोभितम् ।
सुलक्षणनखाङ्गुष्ठतलकान्तिविचित्रितम् ॥ २२६ ॥
इन्दीवरदलश्याम मिन्दिराकरलालितम् ।
नमत्सुरकिरीटाग्र रत्नदीपालिराजितम् ॥ २२७ ॥
गङ्गाया लोकपावन्या जनकं पद्मसुन्दरम् ।
पातालमूलं सत्सेव्यं पङ्कजोद्भवपूजितम् ॥ २२८ ॥
स्मरणात्सर्वपापघ्नं ज्ञानविज्ञानदं सताम् ।
मोक्षदं ज्ञानिनां चैव मुक्तानां नित्यसौख्यदम् ॥ २२९ ॥
नहि ते पदगुल्फोऽयं पीताम्बरदशान्तिके ।
केतकीखण्डहस्तस्य शतचन्द्रः सुतस्य ते ॥ २३० ॥

श्रीधरैते न ते जङ्घे तटित्पीततटान्तरे ।
किन्तु मन्मथतूणीरौ मेघवर्णौ महाद्भुतौ ॥ २३१ ॥
जानुद्वयमिदं देव न ते लक्ष्म्या दिने दिने ।
करश्रमहरं स्थूलमहानीलमणिद्वयम् ॥ २३२ ॥
ऊरुद्वयमिदं देव न ते लक्ष्मीसुखासनम् ।
कान्तं करिकरद्वंद्वं खगेन्द्रभुजभूषणम् ॥ २३३ ॥
अहो कटितटं भाति मणिकाञ्चीगुणोज्ज्वलम् ।
तव पीताम्बराधारं सुमेरुकटकं यथा ॥ २३४ ॥
पद्मनाभ तवाभाति नाभीपद्मं जगन्मयम् ।
चराचरजगत्स्रष्टु र्विधेर्जननभूरिदम् ॥ २३५ ॥

हाराणां तरलश्रेणीमणीषु प्रतिबिम्बितम् ।
विश्वमौदरवद्देव दृश्यतेऽस्मिन्तवोदरे ॥ २३६ ॥

रत्नकङ्कणकेयूर वलयोज्वलमायतम् ।
रम्यकेसरकर्पूर शोभिचन्दनरूषितम् ॥ २३७ ॥

शङ्खचक्रवराभीति युक्तं बाहुचतुष्टयम्
भातीश ते ऽददत्सद्भ्यः पुरुषार्थचतुष्टयम् ॥ २३८ ॥

धर्मं रक्षसि चक्रेण शङ्खेनार्थं ददासि हि ।
वरेण सर्वकामांश्च सतां मुक्तिमभीतितः ॥ २३९ ॥

भुजान्तरमिदं भाति नभोन्तरमिवायतम् ।
तत्र मध्यगतो भाति कौस्तुभोऽर्क इव श्रिया ॥ २४० ॥

तद्दक्षिणेऽभ्रखण्डाभं भाति श्रीवत्सलाञ्छनम् ।
अचञ्चलतटित्कान्तिरतत्र श्रीरपि ते प्रिया ॥ २४१ ॥
उद्यदादित्यरश्मीनां पुञ्जमात्मरुचा मुहुः ।
जयन्ती वैजयन्तीयं हृदये तव शोभते ॥ २४२ ॥
सालग्रामशिलामाला वैकुण्ठ तव विग्रहे ।
अन्तस्थाजाण्डबीजानां मालेव परिदृश्यते ॥ २४३ ॥
वनमाला विभात्येषा रत्नाभरणविग्रहे ।
रत्नसानुसमाक्रान्तशक्रचापोपमा तव ॥ २४४ ॥
दक्षिणोर्ध्वकरे भाति चक्रं सूर्यसमप्रभम् ।
तदधःकरपद्मे ते दृश्यते वरमुद्रिका ॥ २४५ ॥

तव वामोर्ध्वहस्ते तु शङ्खो भाति शशिप्रभः ।
तदधस्तनहस्तेन सूच्यतेऽभयमुद्रिका ॥ २४६ ॥
अभीतिस्ते मया दत्ता मुक्तोऽसि भवबन्धनात् ।
उत्तिष्ठोत्तिष्ठ वत्सेति वक्तीव स पदानतम् ॥ २४७ ॥
विचित्रमणिहाराढ्यः कण्ठस्ते कम्बुसुन्दरः ।
भाति कौस्तुभरत्नेन तच्चानेन जगत्त्रये ॥ २४८ ॥
वदनं तव गोविन्द विभातीन्दुमनोहरम् ।
स्मितचन्द्रसुधाधारविद्रुमाधरसम्पुटम् ॥ २४९ ॥
गण्डस्थललसत्कर्ण कुण्डलश्रीविराजितम् ।
प्रफुल्लचम्पकाकार किञ्चिदुन्नतनासिकम् ॥ २५० ॥

स्मरकोदण्डसङ्काश भ्रूदण्डयुगलोज्ज्वलम् ।
कारुण्यामृतपाथोधि कल्लोलायितलोचनम् ॥ २९१ ॥
पुण्डरीकदला सक्त षट्पदोपमनारकम् ।
कटाक्षैराद्रताजादि समस्तसुरसञ्चयम् ॥ २९२ ॥
विनिर्मललललाटस्थ कस्तूरीनिलकोज्ज्वलम् ।
देवमेव्यं रमाभोग्यं भाग्यं च हृदि पश्यताम् ॥ २९३ ॥
भाति कोट्यर्कसङ्काश रत्नकोटीरमच्युत ।
मस्तकं नेऽलिकस्रस्त प्रशस्तकुटलालकम् ॥ २९४ ॥
एवमद्भुतरूपं त्वां दिव्यमङ्गलविग्रहम् ।
अनन्तशीर्षपादाक्षं प्रणतोऽस्मि मुहुर्मुहुः ॥ २९५ ॥

ब्राह्मणा मुखमासंस्ते क्षत्रिया बाहुजास्तव ।
वैश्यास्तवोरुजा देव शूद्राः पद्भ्यां प्रजज्ञिरे ॥ २५६ ॥
मनसश्चन्द्रमा जातः चक्षुषः सूर्य एव च ।
मुखादिन्द्रश्च वन्हिश्च प्राणाद्वायुश्च ते प्रभो ॥ २५७ ॥
नाभितोऽभूदन्तरिक्षं शिरसो द्यौर्बभूव ह ।
पद्भ्यां भूमिस्तथा जज्ञे श्रोत्राद्देव दिशोऽभवन् ॥ २५८ ॥
सर्वलोकाश्रयोऽसि त्वं सर्वदेवाश्रयोऽपि च ।
सर्वयज्ञमयोऽसि त्वं सर्ववेदमयोऽपि च ॥ २५९ ॥
निमित्तमात्रं ब्रह्माद्याः सृष्टचादौ जगतोऽस्य हि ।
सर्वं सृजसि पास्यत्सि स्वतन्त्रोऽसि रमापते ॥ २६० ॥

धर्माधर्मौ सुखं दुःखं लाभालाभौ जयाजयौ ।
ज्ञानाज्ञाने बन्धमोक्षौ सर्वं त्वतः प्रवर्तते ॥ २६१ ॥
सर्वत्र परिपूर्णोऽसि निर्गुणोऽसि निरञ्जनः ।
सच्चिदानन्दरूपोऽसि गुणपूर्णोऽसि सत्पते ॥ २६२ ॥
कृपया तव गोविन्द जानामि त्वां सुरेश्वरम् ।
यथामति यथायोग्यं भजामि च पुनःपुनः ॥ २६३ ॥
यत्र कुत्र प्रदेशे वा वासो भवतु मे हरे ।
मानसं तव पादाब्जे सदा वसतु मामकम् ॥ २६४ ॥
तव रूपमिदं देव सर्वदैवैर्नमस्कृतम् ।
सदा वसतु मच्चित्ते तथा कुरु दयां मयि ॥ २६५ ॥

भो श्रीनिवास करुणाम्बुनिधे विधेहि
वासं ह्यमूषु रुचिरप्रतिमासु नित्यम् ।
मद्वंशजैरपि मया च गृहाण पूजां
श्रीभूयुतो मम भवान् कुलदैवतं हि ॥ २६६ ॥
त्वामेव मनसा ध्यायन् त्वामेव विधिनाऽर्चयन् ।
कारुण्यात्तव गोविन्द तरामि भवसागरम् ॥ २६७ ॥
कारुण्यात्तव गोविन्द वृद्धभाक्तः क्षणे क्षणे ।
कुम्भकारोऽप्यगान्मुक्तिं ग्रन्थकृत्किंवृथा भवेत् ॥ २६८ ॥
इत्युक्तः श्रीपतिस्तस्मै पुष्पदानेन सूचयन् ।
स्वप्रमादं द्विजायाशु पुनरन्तर्हितोऽभवत् ॥ २६९ ॥

इत्युक्तः श्रीपतिस्तस्मै पुष्पदानेन सूचयन् ।
स्वप्रसादं द्विजायाशु पुनरन्तर्हितोऽभवत् ॥ २६९ ॥
सोऽपि लब्ध्वा प्रसादं तं स्वेच्छया सञ्चरन् महीम् ।
पूजयामास गोविन्दं तन्न्यस्ताखिलधीन्द्रियः ॥ २७० ॥
वेङ्कटार्यकृतं ह्येतन्नक्षत्रदशकं हरेः ।
श्रीनिवासस्य सेवार्थं तद्यशोरूपमौक्तिकैः ॥ २७१ ॥

इतिश्री वेङ्कटार्यविरांचनं श्रीनिवासयात्रानक्षत्रमालादशकं
समाप्तम्

॥ श्रीलक्ष्मीवेङ्कटेशार्पणमस्तु ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ श्रीश्रीनिवासाय नमः ॥

—* श्रीश्रीनिवासमालाप्रारम्भः *—

श्रीश प्रसीद करुणाकर विश्वमूर्ते
विष्णो प्रसन्नवदनाम्बुज पद्मनेत्र ।
पाहि प्रपन्नमिममाशु चतुर्भुजेति
नौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १ ॥

कालः कलिः कलुषवन्निखिलं तपश्च
कायोऽपि दुर्बलतमश्चपलं मनश्च ।

आशा परं स्पृशति विष्णुपदं हि तस्मात
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ २ ॥
यन्नश्चमभाग्यभरितासु वनस्थलीषु
वाञ्छन्ति वाममृषयः स्वतपोवनाय ।
सिध्यन्ति चात्र चरितानि तपांसि तेषां
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ३ ॥
यत्पादुकाद्वयमभून्मकुटं महार्हं
साकेतराज्यभरणे भरतस्य पूर्वम् ।
यच्चिन्तनं च तरणिस्तरणे शुगब्धेः
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ४ ॥

यत्पांसुलेशलवलेशकणाणुलेश-
संपर्कतः किल सती ह्यसती बभूव ।
सा गौतमस्य सुदती च शिला प्रभूता
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ५ ॥

यत्सेवनाय भुवि केवलमात्मरक्ताः
जाता हि ते विविधयोनिषु देववर्याः ।
जाते हरौ विह भवेत्किमु कार्यमेषां
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ६ ॥

यद्वर्णनाय कमला कमलं प्रगृह्य
पार्श्वस्थितैव गणयन्त्यपि तद्गुणौघम् ।

आस्ते नथैव सततं बत निष्प्रयत्ना
नौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ७ ॥
यद्वर्णनाय कृतनैकशिरःप्रकम्पः
शेषस्सहस्रवदनैर्विहितप्रयत्नः ।
नान्तं व्रजन्नपि ययोर्न जहाति मूलं
नौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ८ ॥
यद्वचानविस्फुरदशेषविशेषबुद्धिः
विश्वं सृजत्यनिशमेव चतुर्मुखोऽपि ।।
यत्पूजनाय स हरोऽपि हरत्यशेषं
नौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९ ॥

यच्चिन्तनामृतमहार्णवमग्नचित्ताः
भक्तास्सदैव भवदावभयात्प्रमुक्ताः ।
सङ्गाय सत्सु विहरन्ति च तौ रमन्ते
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १० ॥

ब्रह्मादिका अपि पुरन्दरपूर्वसर्व-
दिक्पालका अपि ययोः परिपूजनेन ।
स्वं स्वं पदं निहतकण्टकमेवमापुः
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ११ ॥

यत्संस्मृतेर्नहि परः परमो विधिर्वा
यद्विस्मृतेर्नहि वरोऽस्ति परो निषेधः ।

नृणां विशुद्धसुखदानचणौ विमुक्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १२ ॥
दोषान् विभिद्य मनसस्तदपि स्ववश्यं
कृत्वाऽऽत्मनिश्चयमतिं च रतिं च दातुम् ।
वज्राङ्कुशध्वजसरोरुहशोभमानौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १३ ॥
सम्पद्ययोः स्मरणमेव हि सज्जनानां
आपच्च विस्मरणमाहुरसज्जनानाम् ।
याभ्यां द्वयोर्नियतमेव सुखं च दुःखं
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १४ ॥

यद्वन्दनं भवति सम्पदवाप्तिहेतुः
यत्संनुतिर्भवति भक्तिविवृद्धिहेतुः ।
यच्चिन्तनं भवति बन्धविमोक्षहेतुः
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १५ ॥

कर्मेन्द्रियाणि निखिलान्यपि यत्पराणि
ज्ञानेन्द्रियाण्यपि सदैव हि यद्गतानि ।
चित्तं च धीश्च सकलं महतां यदर्थं
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १६ ॥

नेत्रे सतां यदवलोकनजागरूके
श्रोत्रे यदीयमहिमश्रवणोत्सुके च ।

गात्रं यदर्चकजनान् परिरब्धुमेव
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १७ ॥
घ्राणं यदर्पितसरोजसुगन्धलुब्धं
जिह्वा यदीयतुलसीस्पृहयालुरास्ते ।
धीर्यद्विचारचपला महतां सदैव
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १८ ॥
हस्तौ यदर्चनरतौ महतां सदैव
पादौ प्रदक्षिणविधौ निरतौ ययोश्च ।
वाचोऽपि यत्र विहरन्ति यथाविनोदं
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १९ ॥

यत्रैव हंसकवरौ मणिनूपुराभ्या-
मागुल्फलम्बिकनकाम्बरमाश्लिपन्तौ ।
उच्चैः स्वसिञ्जितमिषात् स्तुवतस्सदैव
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ २० ॥
यावेव योगिहृदयान्तरवर्तमानौ
तत्रत्यमोहनिमिरं नखचन्द्रिकाभिः ।
दुर्वारमाशु परिहृत्य विभासमानौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ २१ ॥
रक्तौ स्वयं ह्यपि पुनर्नखकान्तियुक्तौ
लाक्षारसैरपि रमाकरपद्ममुक्तैः ।

सिक्तौ जपाकुसुमगुच्छसमच्छवी यौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ २२ ॥

ताद्दक्कृपारसझरीपरिपूरितास्य
वक्त्राम्बुजोत्थदरहासरुचा युतस्य ।
ताद्दक्कटाक्षनिचयस्य सुयोगहेतू
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ २३ ॥

कण्ठस्थकौस्तुभमणिद्युमणिप्रकाश-
विद्योतमानवसनाभरणात्मरूपा ।
यन्नूपुरौ स्पृशति सा नववन्यमाला
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ २४ ॥

भास्वत्किरीटमणिकुण्डलहारकाञ्ची-
केयूरमुख्यवरभूषणभूषितस्य ।
रूपस्य तस्य बत यौ परमानुरूपौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ २५ ॥

तस्यातपत्रयुगलस्य शशिप्रभस्य
यौ तस्य चामरयुगस्य महाद्भुतस्य ।
तस्य प्रसन्नवदनस्य च युक्तरूपौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ २६ ॥

यौ पारिजातहरणाय रणाय बाण-
भौमादिभिर्झडिति खे जयति प्रयाणे ।

स्कन्धे विरेजतुरलं विनतासुतस्य
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ॥ २७ ॥

भूमौ बलेन सह दिग्विजयोत्सवे च
ह्यन्तःपुरेण सह बन्धुगृहोत्सवे च ।
दिव्ये रथे ऽतिविभवैस्समलङ्कृतौ यौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ॥ २८ ॥

नक्रेण साधु चरणेऽम्भसि सङ्गृहीतं
श्रान्तं गजेन्द्रमवितुं त्वरया प्रयातुम् ।
आरुह्य तार्क्ष्यमपि न स्तिमितं हि याभ्यां
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ॥ २९ ॥

प्रह्लादमार्तमुपलक्ष्य हिरण्यकेन
व्याप्तचा चराचरमगे स्थितमत्र याभ्याम् ।
तद्रक्षणे क्षणविलम्बभिया दयार्द्रौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ३० ॥

श्रान्तान्निरीक्ष्य सहसा युधि पार्थरथ्यान्
तेषां श्रमापनयनाय सुदूरमुर्व्याम् ।
याभ्यां प्रयातमरुणामलकोमलाभ्यां
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ३१ ॥

याभ्यां पितुर्वचसि गौरवमाप्य पूर्वं
पश्चाच्च गोषु कृपया किल दण्डकायाम् ।

वृन्दावने च चलितं सहजेन साकं
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ३२ ॥
नीराजितौ निखिलराजकिरीटरत्न-
रश्मिच्छटाभिरवनौ बहुवारमिष्टौ ।
सद्रत्नचित्रितवरासनसन्निविष्टौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ३३ ॥
मर्त्यैश्च मर्त्यविभवेन यथास्वयोग्यं
देवैश्च देवविभवेन तथैव नित्यम् ।
लक्ष्म्या च पूर्णविभवेन सुपूज्यमानौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ३४ ॥

याभ्यां त्रिविक्रमतनौ भुवनत्रयं च ।
क्रान्तं सुखेन निमिषेण तदा यदेकः ।
ऊर्ध्वं प्रविश्य विधिवद्विधिनाऽर्चितोभूत्
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ३५ ॥

पुण्या यदेकनखभिन्नसरोजजाण्ड-
भाण्डोर्ध्वरन्ध्रनिसृता बहिरम्बुधारा ।
लोकान्विकम्पयति नित्यमनन्तरूपा
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ३६ ॥

नीराजितौ दिवि सदा विधिशर्वपूर्व-
गीर्वाणबृन्दमकुटीनवरत्नकान्त्या ।

सम्पूजितौ विविधमुक्तगणैः स्वलोके
नौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ३७ ॥

प्राणो हि वेद तदनुग्रहतोऽन्यदेवाः
वेदाश्चराचरगुरुर्भगवान्विधिश्च ।
श्रीश्च स्वयं च यदिमौ परमौ क्रमेण
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ३८ ॥

श्रीवेङ्कटाद्रिघटिकाद्रिगजाद्रिभद्र-
तोताद्रिपुष्करमुखेषु महास्थलेषु ।
तद्वत्स्वभक्तहृदयेऽपि सदा चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रवद्ये ॥ ३९ ॥

दिव्यौ चराचरजगद्बहिरन्तरस्थौ
नित्यौ च निर्मलतरौ च गुणैश्च पूर्णौ ।
भव्यौ च भक्तिवशगौ च भवाब्धिपोतौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ४० ॥

यौ पञ्चधाऽपि शतधाऽपि सहस्रधाऽपि
विश्वं प्रविश्य वहतः परतः परौ च ।
दूरेऽन्तिके च निखिले च निरन्तरस्थौ
तौ श्रीनिवासचचरणौ शरणं प्रपद्ये ॥ ४१ ॥

प्रह्लादनारदपराशरपुण्डरीक-
व्यासाम्बरीषशुकशौनकभीष्मकाद्यैः ।

सम्पूजितौ सकलभागवतप्रधानैः
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ४२ ॥
गङ्गादितीर्थसलिलेषु वनेषु गोषु
गोवर्धनादिषु नगेषु मखेषु सत्सु ।
सर्वत्र सद्भिरनिशं प्रविचिन्त्यमानौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ४३ ॥
सत्कर्मिणां त्रिदिवदौ चलसौख्यदौ च
दुष्कर्मिणां निरयदौ भृशदुःखदौ च ।
विज्ञानिनाममृतदौ निजसौख्यदौ च
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ४४ ॥

तीर्थप्रसादमहिमैव ययोर्वचांसि
चेतांसि चातिमहतामतिवर्तते हि ।
किम्वात्मनोः सुरजसां महिमा तथेति
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ४५ ॥

यत्पूर्णवर्णनविधौ कमलाऽपि नालं
ब्रह्मादयः किमु यदल्पनुतौ क्रमेण ।
दक्षा नरर्षिवृषवीन्द्रविधिश्रियोऽमी
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ४६ ॥

यत्रेन्दिरानयनभृङ्गमतीव रक्तं
सम्प्रेक्ष्य भूरपि तथाऽऽस दरस्मितश्रीः ।

तत्र त्रपैव निमिषं खलु सत्रपाऽभूत्
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ४७ ॥
माकन्दपल्लवमनोज्ञतलप्रदेशौ
बालेन्दुसुन्दसुरक्तनखप्रकाशौ ।
श्रीभूकराम्बुजपुटोचितसन्निवेशौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ४८ ॥
कन्दर्पधौतशतचन्द्रसमानगुल्फौ
तद्बाणराजिरमणीयनखाग्ररेखौ ।
तद्वीरवादसमनूपुरसिञ्जितौ यौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ४९ ॥

लीलागतेन विजिताः खलु राजहंसा
यत्रैव हंसकमिषेण सदा प्रसन्नाः ।
तन्मञ्जुसिञ्जितमिषेण जपन्ति मन्त्रान्
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९० ॥

वक्त्रेन्दुना विजित एष शशी निजाङ्के-
राकाशशाणकपणै र्गुळिकीभवद्भिः ।
यो सेवते नखमिषेण सुपुण्यपूर्णः
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९१ ॥

दिव्यैः सुवर्णकमलैः कमलैश्च रत्नैः
धातुः कराग्रपतितैस्तुलसीविमिश्रैः ।

नित्यं त्रिवारमभितः स्फुरितस्वपीठौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९२ ॥
तादृङ्नखद्युतिविशेषसुपूर्णसाम्यं
स्वायोग्यमाप्तुमनसो विधिनैव तारः ।
बन्दीकृता इव ययोस्सविधे प्रदीप्ताः
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९३ ॥
यौ द्वौ सदा स्वजनकाविति विष्णुपद्या
रूपद्वयेन वरचामरवेषभाजा ।
पार्श्वद्वयेऽपि सततं परिसेव्यमानौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९४ ॥

चन्द्रो नखद्युतिजिताः स्वकलाश्च हुत्वा
वह्न्यादिषु क्रमश एव रविं प्रविश्य ।
छत्रात्मनाऽऽस्त यदुपर्यमृताभिपूर्णः
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९५ ॥

सूर्योऽपि कौस्तुभमणिप्रभया प्रभग्नः
तत्तोऽधिकश्रियमपेक्ष्य सहस्ररूपः ।
यन्नूपुरौ शरणमाप मणीमिषेण
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९६ ॥

शुक्रोऽपि कर्णगतहीरमणिप्रकाश-
मिच्छन् यदीयमणिनूपुरकिङ्किणीषु ।

नृत्यं करोति हि मणीशकलच्छलेन
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९७ ॥

भौमोऽधरोष्ठमणिकान्तिमभीप्समानो
यद्वक्त्रकोमलतलस्य करोति सेवाम् ।
भक्त्या ह्यलक्तकमिषेण सुरक्तरूपः
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९८ ॥

रेखामयानि रुचिराणि परिस्फुटानि
वज्राङ्कुशध्वजदरारिगदाम्बुजानि ।
यद्वक्त्रकोमलतले विमले जयन्ति
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९९ ॥

भक्त्या सदैव भजतां महतां महाप
त्मन्दोहशैलशकलीकरणाय वज्रम् ।
रेखामयं जयति यत्र तले निताम्तं
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ६० ॥
मोक्षार्थिनां सुकृतिनां निजसेवकानां
कामादिदुष्टमदवारणवारणाय ।
रेखामयोऽस्ति हि यदीयतले ऽङ्कुशश्च
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ६१ ॥
नित्यं निजाश्रितजनं ध्वजवत्करोमि
ह्यत्युच्छ्रितं भुवि नृणामिति सूचनाय ।

रेखाध्वजो जयति यत्तलगस्सदैव
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ६२ ॥
संसारदावदहनातुरसज्जनानां
तापच्छिदे जयति यत्तलशङ्खरेखा ।
नामामृतं ह्यतिसुखेन मुखे प्रयोक्तुं
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ६३ ॥
छेत्तुं शिरांसि निजभक्तविरोधिनां द्राक्
भेत्तुं तमो हृदयगं भुवि योगिनां च ।
चक्रं सदा स्फुरति यत्तलगं सुरेखं
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ६४ ॥

संचूर्णनायसहसा शरणागतस्थ-
हत्यादिदोषबहुकृत्रिमभूधराणाम् ।
रेखामयी जयति यत्तलगा गदाऽपि
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ६५ ॥

नित्यं ललन्तु सुखसारमयैर्मरन्दैः
योगीशचित्तमधुपप्रकरा मुदेति ।
रेखाम्बुजं स्फुरति यत्तलगं सदैव
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ६६ ॥

हन्तुं वियत्तलगतः शकटाक्षनामा
दैत्यो महामृदुतरं शिशुलीलयैव ।

याभ्यां हतो भुवि मृतोऽपतदेव पूर्वं
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ६७ ॥

सा पूतना स्तनरसं गरलेन मिश्रं
दत्वाऽसुभिर्विरहिता बत यत्नलेन ।
क्षिप्ता बहिर्वनगताऽऽस सुगन्धदेहा
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ६८ ॥

कालीयपन्नगफणामणिपीठमध्ये
यद्यामुनह्रदजले सुरवाद्यचित्रम् ।
नृत्तं प्रवर्तितमभूत्तदिदं हि याभ्यां
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ६९ ॥

कालीयनागमवलोक्य निसर्गवैरी
यच्छाञ्छितायतफणं फणिराजमेनम् ।
तार्क्ष्यः करोति सततं बहुमानमेव
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ७० ॥

सन्मानसं विशति हंसवधूरिवाच्छं
यत्कीर्तिरब्जविमला स्मिततुल्यशीला ।
कान्तौ नखद्युतिभिरद्भुतनूपुराढ्यौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ७१ ॥

व्याप्तचा त्रयेऽपि जगतां स्वसुतायमाना
हृत्कर्णयोरपि सताममृतायमाना ।

यत्कीर्तिरम्बुजभवाण्डमिदं पुनाति
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ७२ ॥

श्रोतुश्च वक्तुरपि योगइतोनुभोगः
सा काकतालघटनैव ययोर्महिम्ना ।
रम्यौ प्रवालसदृशाङ्गुलिशोभमानौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ७३ ॥

नीलौ स्वयं वसनकान्तिबलेन पीतौ
श्वेतौ नखद्युतिभिरङ्गुलिभिः सुरक्तौ ।
सद्रत्नभूषणगणद्युतिभिर्विचित्रौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ७४ ॥

चेतः स्वभावतरलं विषयार्थि नित्यं
नानापथैर्द्रवति तस्य तथाविधैश्च ।
मार्गैर्वशीकरणमास्त्विति सर्वरूपौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ७५ ॥
श्रीभूयुतौ सकललोकनमस्कृतौ च
सर्वार्चितौ सकलवैभवशोभितौ च ।
सर्वेष्टदौ च सकलार्तिहरौ शरण्यौ
तौ श्रीनिवसचरणौ शरणं प्रपद्ये ॥ ७६ ॥
पुण्यौ पवित्रतरसद्गुणकीर्तनौ च
तीर्थाश्रयौ विविधमुक्तजनाश्रयौ च ।

पापापहौ च परमौ च तमः परौ च
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ७७ ॥
सिन्धुर्यथा जयति सिन्धुरिवाभ्रचुम्बी
चन्द्रोयथा जयति चन्द्र इवातिकान्तः ।
यौ द्वौ तथैव बत यावित्र पूर्णकीर्ती
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ७८ ॥
कीर्तिर्ययोरमरासिन्धुरिवातिपुण्या
सा सिन्धुरप्यहह कीर्तिरिवातिपुण्या ।
याभ्यां जगत्त्रयमिदं बहुधैव धन्यं
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ७९ ॥

लक्ष्मीश केशव हरेच्युत पद्मनाभ
दामोदर क्रतुपते मधुसूदनेति ।
भक्त्या सदैव वदतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ८० ॥

श्रीमन्नधोक्षज जनार्दन वासुदेव
श्रीनारसिंह पुरुषोत्तम वामनेति ।
भक्त्या सदैव वदतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ८१ ॥

श्रीकृष्ण कृष्णसख वृष्णिकुलावतंस
नारायणामरगुरोऽजित माधवेति ।

भक्त्या सदैव वदतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ८२ ॥
विष्णो त्रिविक्रम हृषीकपते मुरारे
गोविन्द गोकुलविहार परात्परेति ।
भक्त्या सदैव वदतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ८३ ॥
देवादिदेव गरुडध्वज हस्तशोभि-
शार्ङ्गासिचर्मदरचक्रगदाम्बुचेति ।
भक्त्या सदैव वदतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ८४ ॥

प्राणप्रिय प्रणतकल्पतरो कृपाल्वो
श्रीवत्सशोभितभुजान्तर भूरिदेति ।
भक्त्या सदैव वदतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ८५ ॥
श्रीमत्स्यकूर्मवरसूकरनारसिंह
श्रीवामनात्तपरशो जय राघवेति ।
भक्त्या सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ८६ ॥
श्रीकृष्ण बुद्ध वरकल्कितनो हयास्य
धन्वन्तरे कपिल दत्त हरे जयेति ।

भक्त्या सदैव वदतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ८७ ॥

उद्यत्प्रभाकरशतायुतकोटिकोटि-
भ्राजत्किरीटवरशोभितमस्तकेन ।
भक्त्या सदैव वदतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ८८ ॥

कोटीरकान्तकुटिलालकशोभिफाल-
न्यस्तप्रशस्तमृगनाभिसुपुण्ड्रकेन ।
भक्त्या सदैव वदतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ८९ ॥

पार्श्वस्फुरत्कमलकैरवकान्तहस्त-
श्रीभूकटाक्षमधुपालिवृताननेति ।
भक्त्या सदैव वदनाभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९० ॥

कर्णप्रदीप्तमणिकुण्डलशोभिगण्ड
रक्ताधरोष्टपुटदीप्तदरस्मितेति ।
भक्त्या सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९१ ॥

मार्ताण्डकोटिसदृशद्युतिभासमान-
श्रीकौस्तुभाभरणशोभिनकन्धरेति ।

भक्त्या सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९२ ॥

केयूरकङ्कणसमुज्वलबाहुदण्ड-
संशोभिचक्रदरमुख्यवरायुधेति ।
भक्त्या सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९३ ॥

श्रीवत्सलाञ्छन रमारमणीयवक्षः-
संशोभिहारतरलान्ततनूदरेति ।
भक्त्या सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवसचरणौ शरणं प्रपद्ये ॥ ९४ ॥

नानाचराचरविधायकजन्मदेश-
नाभीसरोज रमणीयसुमध्यमेति ।
भक्तच्या सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९५ ॥

विद्युत्सहस्रनिचयोपमरत्नकाञ्ची-
भास्वन्नितम्बजघनस्फुरितांशुकेति ।
भक्तच्या सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९६ ॥

आगुल्फलंबिकनकाम्बरसंवृतोरु-
जान्वायतातुलसुवर्तुलजङ्घकेति ।

भक्तचा सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९७ ॥

मात्रेप्रदर्शितनिजोदरविद्यमान-
नानाप्रपञ्च नरकार्णवतारणेति ।
भक्तचा सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९८ ॥

जात्यन्धकेपि कृपया सुदृशं प्रदाय
स्वं विश्वरूपमुरु दर्शितवानसीति ।
भक्तचा सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ ९९ ॥

कारुण्यसिन्धुरासि भक्तसुरद्रुमोऽसि
सर्वोऽसि शर्वविनुतोऽसितरां जयेति ।
भक्त्या सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १०० ॥
भक्तप्रियोऽसि भवबन्धविमोचकोऽसि
ज्ञानप्रदोऽसि सुखदोऽसि हरे जयेति ।
भक्त्या सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १०१ ॥
पूर्णोऽसि पूर्णसुगुणोऽसि पुरातनोऽसि
मोक्षप्रदोऽसि भगवन् जय सर्वदेति ।

भक्त्या सदैव भजतामभितश्चरन्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १०२ ॥

श्रीवेङ्कटाचलतले बहुतीर्थसेव्ये
श्रीब्रह्मरुद्रमुखदेववरैकभाव्ये ।
व्यक्तौ सतामपि जगत्त्रितयप्रसक्तौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १०३ ॥

छत्रध्वजव्यजनचामरचर्मवेत्र-
पात्रप्रदीपशयनासनयानरूपैः ।
लक्ष्म्या सदैव परितः परिसेव्यमानौ
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १०४ ॥

पापोऽस्मि पापनिरतोऽस्मि सदाऽलसोऽस्मि
हत्यादिदोषविषये निरपत्रपोऽस्मि ।
मूर्खोऽस्मि मामवितुमन्यदितो नहीति
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १०५ ॥

पापं व्यपोहतुतरां जयतु स्वपुण्यं
त्वद्दर्शके त्वयि च मे सुदाऽस्तु भक्तिः ।
दास्ये तवास्तु रतिरच्युत सर्वदेति
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १०६ ॥

त्वत्कीर्तके जगति माऽस्तु ममाभिमानः
मत्स्वामिनि त्वयि सदैव ममास्तु भक्तिः ।

त्वत्प्रीतिरस्तु मयि भृत्यतमे सदेति
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १०७ ॥
जानामि नाहमहितञ्च हितञ्च सम्यक्
सवज्ञमूर्तिरसि ते विदितं हि सर्वम् ।
मां सर्वदैव हित एव नियोजयेति
तौ श्रीनिवासचरणौ शरणं प्रपद्ये ॥ १०८ ॥
यो वेङ्कटार्यशरणागतिसारसानां तच्छ्रीनिवासचरणाब्जसमर्पितानाम्।
अष्टोत्तरं शतमिदं हृदये सदैव मालाकृतं वहति भक्तियुतस्स धन्यः॥

॥ इति श्रीवेङ्कटार्यविरचिता श्रीनिवासमाला समाप्ता ॥

जयालय यन्त्रे मुद्रिता, मैसूरु १९१४.

॥ श्री वरदराजाय नमः ॥

श्री वरदराजस्तव प्रारम्भः

वेङ्कटाख्यो द्विजः कश्चित् षडरण्यकृतालयः ।
भूपालप्रेष्यतां प्राप पोष्यपोषणतत्परः ॥ १ ॥
काञ्चीमहोत्सवायासौ गन्तुमाज्ञां न लब्धवान् ।
बहुधा यतमानोऽपि राज्ञः कार्यैकचेतसः ॥ २ ॥
स तु काञ्चीं रथाश्वादिवाहनैः प्रस्थितान् जनान् ।
आबालवृद्धमालोक्य भक्त्युद्रेकादिदं जगौ ॥ ३ ॥

अहो कष्टमहो कष्टं नराणां परवश्यता ।
यया वरदराजस्य न पश्यामि मुखाम्बुजम् ॥ ४ ॥
अहो सौख्यमहो सौख्यं नृणामपरवश्यता ।
यया वरदराजस्य पश्यन्त्येते महोत्सवम् ॥ ५ ॥
अहो वरदराजस्य ह्यतिरम्यो महोत्सवः ।
अहो सुजनसम्मर्दस्तत्र काञ्चयां महागुणः ॥ ६ ॥
अहो सौभाग्यमेतेषां काञ्चयुत्सवनिषेविणाम् ।
अहो दौर्भाग्यमस्माकमद्य काञ्चीमपश्यताम् ॥ ७ ॥
भवेत्काञ्चीप्रदेशोऽद्य प्रजाश्रेणीभिरद्भुतः ।
सर्वतस्संपतन्तीभिर्नदीभिरिव सागरः ॥ ८ ॥

अद्य काञ्ची महाधन्या धन्या वरदसेवया ।
मिलिता वैणिका यत्र गायन्ति नृहरेः कथाम् ॥ ९ ॥
अहो भाग्यमहो भाग्यं काञ्चयां निवसतां सताम् ।
येऽभ्यागतान् द्विजानस्मिन् भोजयन्ति महोत्सवे ॥ १० ॥
अहो पुण्यमहो पुण्यमन्नदानां महोत्सवे ।
आहूयाहूय दास्यन्ति येऽन्नदानमनुत्तमम् ॥ ११ ॥
अहो धैर्यमहो धैर्यं नृत्यतां सत्समागमे ।
दीनानां दानशौण्डानां काले मृष्टान्नदायिनाम् ॥ १२ ॥
अहो पुण्यमहो पुण्यं वदान्यानां महोत्सवे ।
पदेपदे प्रवर्षन्ति पात्रे देयानि येऽन्वहम् ॥ १३ ॥

अहो काञ्ची महाक्षेत्रं प्राप्यते यत्र दुर्गतैः ।
अल्पयत्नैर्महत्पुण्यमल्पपुण्यैर्महत्फलम् ॥ १४ ॥
अहो काञ्ची महारम्या ह्युत्सवेऽत्र पुरस्त्रियः ।
भूषयन्ति सदा हर्म्यश्रेणीवेणीमलङ्कृताः ॥ १५ ॥
अद्य काञ्ची महारम्या चन्द्रकान्तविनिर्मितैः ।
देवालयैस्सुबहुभिस्तीर्थोद्यानैः स्वलङ्कृतैः ॥ १६ ॥
अद्य काञ्ची माहारम्या वरदस्य महोत्सवे ।
स्वलङ्कृतै राजमार्गैर्गृहचत्वरतोरणैः ॥ १७ ॥
अद्य काञ्ची महारम्या देवागमनकाङ्क्षिभिः ।
स्नातानुलिप्तैस्तद्भक्तैर्वस्त्राभरणशोभितैः ॥ १८ ॥


अद्य काञ्चयां प्रपश्यन्ति सन्तो वरदमन्दिरम् ।
परिवारसुरस्थानै वैंकुण्ठमिव सुन्दरम् ॥ १९ ॥
पुण्यकोटिविमानाग्रदर्शनात्तेऽद्य दण्डवत् ।
पतन्ति परया भक्त्या प्रमोदाश्रुपरिप्लुताः ॥ २० ॥
अनन्तसरसि स्नाताः त्यक्तसर्वमनोमलाः ।
पश्यन्ति हस्तिशैलेऽद्य वरदस्य मुखाम्बुजम् ॥ २१ ॥
वरदस्याद्य पास्यन्ति वदनेन्दुसुधां सुखम् ।
तृषिता हृषितास्सन्तश्चकोरा इव चन्द्रिकाम् ॥ २२ ॥
ते धन्यास्ते पुनर्धन्यास्ते च धन्याः पुनःपुनः ।
येऽन्वहं वरदोपान्ते जीवन्ति जलवृत्तयः ॥ २३ ॥

तेऽपि पुण्यतमा लोके वरदस्य मुखाम्बुजम् ।
महोत्सवेऽपि ये केचित्पश्यन्ति प्रतिवत्सरम् ॥ २४ ॥
धिङ्मामपुण्यं निर्लज्जं निजोदरनिषेविणम् ।
वसन्नपि न पश्यामि निकटेऽद्य महोत्सवम् ॥ २५ ॥
ब्राह्मणानां वैष्णवानां सहस्राणां सहस्रकम् ।
अन्यत्र क्व नु पश्यामि विना काञ्चीमहोत्सवम् ॥२६॥
तादृङ्महोत्सवं द्रष्टुं तच्च सम्मेलनं सताम् ।
यातुं स्थातुमनीशोऽहमीश्वरेणैव वञ्चितः ॥ २७ ॥
अथवा स दयामूर्तिः करीन्द्रवरदोऽद्य माम् ।
सक्तं निजपदाम्भोजे भक्तं कथमुपेक्षते ॥ २८ ॥

नैवोपेक्षा दयैवास्य मयि तत्पादलम्बिनि ।
स्वमुखं मनसा ध्यायन् कृतकृत्यो भवेदिति ॥ २९ ॥
अतस्तद्धृदनाम्भोजं योगिध्येयमकल्मषम् ।
भावयाम्यद्य मनसा यथाशक्ति यथामति ॥ ३० ॥

— इति श्रीवरदराजस्तवे —

* पूर्वभागः समाप्तः *



—* अथ उत्तरभागः *—

महति वेगवत्युत्तरे तटे करिगिरेरुपर्युत्तमासने ।
निवसतस्सतामर्थसिद्धये वरद तन्मुखं भावयामि ते ॥ १ ॥

कमलजन्मना कञ्जनाभ य द्धृदयपञ्जरे धार्यते सदा ।
यदिह तन्मखे दृष्टिगोचरं वरद तन्मुखं भावयामि ते ॥ २ ॥

वहति यद्वपागन्धमुत्तमं ह्यधरसंपुटे दिक्षु संततम् ।
स्मितमनोहरं पद्मसुन्दरं वरद तन्मुखं भावयामि ते ॥ ३ ॥

कलिमलापहं कामितार्थदं कुटिलकुन्तलं कोमलाधरम् ।
विपुललोचनं विश्वमोहनं वरद तन्मुखं भावयामि ते ॥ ४ ॥

प्रलयवारिधौ श्रीवटच्छदे पदनखत्विषा स्वोष्ठमीयुषा ।
यदतिसुन्दरं बालरूपिणो वरद तन्मुखं भावयामि ते ॥ ५ ॥
रहसि यच्छ्रिया प्रेमचुम्बितं सदसि वेधसा ह्यादरार्चितम् ।
मनसि योगिनां भावितं मुदा वरद तन्मुखं भावयामि ते ॥ ६ ॥
मनसि योगिनां ज्ञानसौख्यदं हृदि वियोगिनां शोकमोहदम् ।
अहह यत्स्मितं चन्द्रिकायते वरद तन्मुखं भावयामि ते ॥ ७ ॥
भुवनमोहनं सुभ्रु सुन्दरं स्मितमनोहरं मञ्जुभाषितम् ।
जलजलोचनं चारुनासिकं वरद तन्मुखं भावयामि ते ॥ ८ ॥
मलयमारुतानीतमल्लिकापरिमलोज्ज्वले मासि माधवे ।
विजयतेतरां यन्महोत्सवे वरद तन्मुखं भावयामि ते ॥ ९ ॥

विविधवाहनैर्द्रागहर्निशं बहुलवैभवैर्भूप्रदक्षिणम् ।
पुरि वितन्वतः श्रीमहोत्सवे वरद तन्मुखं भावयामि ते ॥१०॥
अलमलङ्कृतं छत्रचामरै रहह यद्द्युतिं स्वर्णमण्डपे ।
नयनकोटिभिर्नालमीक्षितुं वरद तन्मुखं भावयामि ते ॥११॥
मृगपतेर्निशि स्कन्धसीमनि ह्युडुपतेरिव श्रीतटित्वतः ।
भुवनतापनुज्जीवनास्पदं वरद तन्मुखं भावयामि ते ॥१२॥
हृदयरञ्जने हंसवाहने मणिविभूषणैश्शोभिताकृतेः ।
जयति मन्मथोत्पादिनोऽद्य यद्वरद तन्मुखं भावयामि ते ॥१३॥
रविशशिप्रभामण्डलान्तरे स्फुरति यत्तटित्कोटिसुन्दरम् ।
सुरवरैर्मुदा सेव्यमद्भुतं वरद तन्मुखं भावयामि ते ॥१४॥

निशि समन्ततो दीपिकाऽयुतै रविशशिप्रभैर्व्यक्तवैभवम् ।
भुवि विमुक्तये भक्तसेवितं वरद तन्मुखं भावयामि ते ॥१५॥
खगपतौ मणिनूपुरस्फुरच्चरणशोभया तत्करोरसोः ।
कलयतो नवां कामपि श्रियं वरद तन्मुखं भावयामि ते ॥१६॥
गरुडमस्तकन्यस्ततन्मणीमकुटकोटिसत्कौस्तुभश्रियः ।
विविधभूषणश्रीलसद्दिशो वरद तन्भुखं भावयामि ते ॥१७॥
निमिषमन्तरं दर्शनार्थिनां सदय काङ्क्षतश्चार्यमोदयम् ।
निलयगोपुरद्वारि तस्थुषो वरद तन्मुखं भावयामि ते ॥१८॥
क्षितिविशालयोश्चन्द्ररम्ययोः कनकदण्डयोश्छत्रयोरधः ।
उभयचामरैश्शोभतेऽद्य यद्वरद तन्मुखं भावयामि ते ॥१९॥

जनमहार्णवे नाक्ष्यनौकया सरसवीक्षणैः पौरशोषिताम् ।
विहरतो विभोश्चित्रिनाङ्क्या वरद तन्मुखं भावयामि ते ॥२०॥
नभसि खेचरैर्नारदादिभि र्भुवि च भूसुरैर्वैणिकैर्मुहुः ।
मधुरया गिरा गीतसौभगं वरद तन्मुखं भावयामि ते ॥२१॥
श्रुतिलसन्मणिकुण्डलत्विषा सततविस्फुरद्गण्डमण्डलम् ।
निटिलशोभितश्रीविशेषकं वरद तन्मुखं भावयामि ते ॥२२॥
रहसि पूतनास्तन्यपायिनो ह्यपि च गोपिकागव्यहारिणः ।
भवति यत्स्मिते संशयो नृणां वरद तन्मुखं भावयामि ते ॥२३॥
खरविघातिनो दण्डकावने विजयसुन्दरं यद्विलोचनम् ।
ऋषिजनानहो प्राग्व्यमोहय द्वरद तन्मुखं भावयामि ते ॥२४॥

उभयपार्श्वगैरापणैर्गृहैः ध्वजपताकिभिश्शोभिते पथि ।
निजजनाकुले न्यस्तचक्षुषो वरद तन्मुखं भावयामि ते ॥२५॥
निजकथानटद्धासमण्डलीसततसंगतापाङ्ग्या दृशा ।
स्फुरति सस्मितं यत्कृपानिधे वरद तन्मुखं भावयामि ते ॥२६॥
गगनचुम्बितैर्वाद्यनिस्वनैः श्रवणमङ्गलैर्वेदनिस्वनैः ।
हृदयरञ्जकैर्गीतनिस्वनैः वरद तन्मुखं भावयामि ते ॥२७॥
पथि जनार्पितैः पात्रसंस्थितैः सफलपुष्पकैरार्तिदीपकैः ।
वियति सेव्यते यत्पदेपदे वरद तन्मुखं भावयामि ते ॥२८॥
प्रणमतां सतां दण्डवद्भुवि स्फुरति सादरं सर्वतो दिवि ।
कुशलपृच्छकं यच्छुचिस्मितं वरद तन्मुखं भावयामि ते ॥२९॥

विधिपुरस्सरैः खस्थितैस्सुरैः यदिह सेव्यते निश्चलेक्षणैः ।
निटिलपाणिमिस्सच्चिदात्मकं वरद तन्मुखं भावयामि ते ॥३०॥
नयनरन्ध्रतो ह्यन्तरागतं हृदयवर्तिना चैक्यमागतम् ।
जयति यत्सतामद्य पश्यतां वरद तन्मुखं भावयामि ते ॥३१॥
युगपदद्य यत्पश्यतां सतां नयनबम्भैरस्सेव्यते दिवि ।
वनजमद्वयं ह्येकमद्भुतं वरद तन्मुखं भावयामि ते ॥३२॥
त्रिपदसम्मितां याचितुं महीमहह योऽभवद्वामनो महान् ।
सपदि याचके भूरिदस्य भो वरद तन्मुखं भावयामि ते ॥३३॥
निगमहारिणं सोमकासुरं युधि निहत्य तान्वेधसे पुनः ।
अनघ यच्छतो मत्स्यरूपिणो वरद तन्मुखं भावयामि ते ॥३४॥

अमृतमन्थने क्षीरवारिधेः पयसि मन्दरं भारविच्युतम् ।
सपदि बिभ्रतः कूर्मरूपिणो वरद तन्मुखं भावयामि ते ॥३५॥
प्रलयवारिधेरुद्धृता मही वियति लीलया येन दंष्ट्रया ।
असुरघातिनः क्रोडरूपिणो वरद तन्मुखं भावयामि ते ॥३६॥
दुरितदूषणं दुष्टभीषणं विपुलवीक्षणं विश्वरक्षणम् ।
नृमृगरूपिणो भक्ततोषणं वरद तन्मुखं भावयामि ते ॥३७॥
त्रिभुवनश्रियं नेतुमन्यतो बलिमुपेत्य यो गामयाचत ।
त्रिपदसम्मितां वामनाकृतेः वरद तन्मुखं भावयामि ते ॥३८॥
त्रिभुवनं पदैर्व्याप्य तिष्ठतो बलिजितस्सतां विस्मयास्पदम् ।
विधिमुखार्चितैरद्भुतैस्त्रिभिः वरद तन्मुखं भावयामि ते ॥३९॥

परशुना महीमर्जुनागसा विरहितां व्यधात् क्षत्रियैस्तु यः ।
अमितशौर्यधैर्भार्गवाकृतेः वरद तन्मुखं भावयामि ते ॥४०॥

विरचितो महान् सेतुरम्बुधावपि हतो रणे रावणोऽनुगैः ।
अजित येन तद्रामरूपिणो वरद तन्मुखं भावयामि ते ॥४१॥

यदुकुलेन्दुना येन लालिता विधिमुखास्सुरा दुष्टशिक्षणैः ।
सुजनरक्षिणः कृष्णरूपिणो वरद तन्मुखं भावयामि ते ॥४२॥

क्वचन दुर्मतीन्मोहयन् जनान् सुभृशमद्भुतैः कर्मभिः स्वकैः ।
जगति योऽभवद्बुद्धरूपिणो वरद तन्मुखं भावयामि ते ॥४३॥

महति संकटे म्लेच्छसंगुते कलियुगेऽन्ततो यो भविष्यति ।
खलविदारिणः कल्किरूपिणो वरद तन्मुखं भावयामि ते ॥४४॥

सुरनरोचितज्ञानसिद्धये श्रुतिगणान् बहूनेकराशिगान् ।
विभजतः पृथग्व्यासरूपिणो वरद तन्मुखं भावयामि ते ॥४५॥
विधिमुखार्चितो विश्वरक्षणं त्रिविधवेषतस्साधु यो व्यधात् ।
विविधरूपिणोऽप्येकरूपिणो वरद तन्मुखं भावयामि ते ॥४६॥
क्वचन विश्रमायोपकल्पिते गगनचुम्बिते गाङ्गमण्डपे ।
विबुधसेवितं स्वर्गसन्निभे वरद तन्मुखं भावयामि ते ॥४७॥
उदयपर्वताकारशोभिनि स्फुरति भानुवद्यद्धनूमति ।
दिवसयन्निशां दीप्तिभैवैः वरद तन्मुखं भावयामि ते ॥४८॥
विनयभूषितश्रीधराननद्युतिविचित्रितापाङ्गवीक्षणम् ।
स्फुरति यद्दृशं शेषवाहने वरद तन्मुखं भावयामि ते ॥४९॥

महितमोहिनीवेषधारिणो रुचिरभूषणैर्यानयायिनः ।
नवरसोज्ज्वलं नाकिसेवितं वरद तन्मुखं भावयामि ते ॥९०॥
स्फुरति विद्रुमोद्दाममण्डपे मकुटसन्मणीमञ्जुलातपे ।
यदतिसुन्दरं मोहनाकृतेः वरद तन्मुखं भावयामि ते ॥९१॥
गजतुरङ्गयोर्भूषिताङ्गयो रुपरि भास्वतस्सायुधैः करैः ।
असुरभीषणं भक्तहर्षणं वरद तन्मुखं भावयामि ते ॥९२॥
मिहिरशेखरे मेरुसुन्दरे भुवनभूषणे भूरिचक्रिणि ।
रथवरेऽद्य यत्सेव्यते बुधैः वरद तन्मुखं भावयामि ते ॥९३॥
उपवनान्तरे रङ्गमण्डपे द्विजकुलाकुले गीतनर्तनैः ।
शिशिरसेवया तुष्टचेतसो वरद तन्मुखं भावयामि ते ॥९४॥

परमशोभनं पुण्यकोटिगं परमयोगिनां ध्येयमद्भुतम् ।
द्युमणिभासुरं दिव्यरूपिणो वरद तन्मुखं भावयामि ते ॥९५॥
भुवनभासुरोशीरमण्डपे भुवनमोहनाकारशोभिनः ।
भवभयापहं भूरिसौख्यदं वरद तन्मुखं भावयामि ते ॥९६॥
विषयभावनालम्पटं मनो भवदवानले तप्तमञ्जसा ।
अमृतवारिधौ मज्जयन्नहं वरद तन्मुखं भावयामि ते ॥९७॥
असुरदुःखदं मोक्षदं सतां भवविनोदिनां मिश्रसौख्यदम् ।
तदपि यत्समं गीयते बुधैः वरद तन्मुखं भावयामि ते ॥९८॥
अथ विहारिणस्तीर्थवारिणा निजमहोत्सवश्रान्तिहारिणा ।
परिजनैस्सह श्रीरमादिभिः वरद तन्मुखं भावयामि ते ॥९९॥

स्फुरति यद्वरे रत्नमण्डपे कनकवाससा कान्तभूषणैः ।
वरकरायुधैर्वन्यमालया वरद तन्मुखं भावयामि ते ॥६०॥
सुभृशमार्जितैर्जन्मकोटिभिः हृदि विभाव्यते पुण्यसञ्चयैः ।
यदिह साधुभिस्साधुसङ्गिभिः वरद तन्मुखं भावयामि ते ॥६१॥
शरदि वैभवैस्सत्सरोजले भुवमिवायतां मेरुभूषिताम् ।
रथयुतां नवां नावमीयुषो वरद तन्मुखं भावयामि ते ॥६२॥
सकलवैभवैस्तत्प्लवोत्सवे सरसि खेलतस्सर्वदैवतैः ।
नभसि शोभते यन्महेन्दुवत् वरद तन्मुखं भावयामि ते ॥६३॥
सह सुरैर्द्विजैः पीतसद्रसैः सरसि सेव्यते यन्महेन्दुना ।
मलयमारुतैर्नक्तमप्यहो वरद तन्मुखं भावयामि ते ॥६४॥

निजगृहं पुनः प्राप्य शोभनं परिजनाहृतं श्रीकरार्चितम् ।
सरसभोजनं प्राप्य तुष्यतो वरद तन्मुखं भावयामि ते ॥६५॥
विकचमल्लिकादामशोभिते ह्यगुरुधूपिनि श्रीकरार्पिते ।
शयनमण्डपे सन्निषीदतो वरद तन्मुखं भावयामि ते ॥६६॥
रहसि यत्पयःफेनसन्निभं शयनमद्भुतं प्राप्य पद्मया ।
व्यजनहस्तया सेव्यतेऽनिशं वरदतन्मुखं भावयामि ते ॥६७॥
इत्थं वरदराजस्य मुखाम्बुजमनुत्तमम् । ध्यायन् परमया भक्त्या सोगात्तन्मयतां द्विजः ॥६८॥ इति वरदराजस्तवे उत्तरभागस्समाप्तः॥

इति श्री वेंकटसूरि विरचितो वरदराजस्तवस्समाप्तः ॥

—* श्रीकृष्णार्पणमस्तु *—

॥ श्री गुरुभ्यो नमः ॥

—* श्रीमज्जयतीर्थाष्टक प्रारम्भः *—

श्रीमन्मध्वगुरूक्ततत्त्वमणिदीप्तचालोकनालोकदा
यद्वाणीमयबालभानुकिरणश्रेणी हृदन्तस्सताम् ।
मायावादमहान्धकूपपतितागम्या सदा भ्राजते
सोऽयं श्रीजयतीर्थतीर्थचरणो भूयाद्विभूत्यै मम ॥ १ ॥

यस्यानुग्रहमन्तरा न मरुतो नापि श्रियो नो हरेः
कारुण्यं समुपैति जातु सुजनोऽप्यन्यप्रयत्नायुतैः ।
यद्योगे सुमतिं च भक्तिमतुलां मुक्तिं करे विन्दते
सोऽयं श्रीजयतीर्थतीर्थचरणो भूयाद्विभूत्यै मम ॥ २ ॥

जाता यस्य वचोधुनी हरिपदाम्भोजादिवास्याम्बुजात्
याता भर्गजटाटवीमिव गिरं व्याख्यामयीं धीमताम् ।
अन्तेवासिनि जन्हुनेव गुरुणा पीतोज्झिता पावनी
सोऽयं श्रीजयतीर्थतीर्थचरणो भूयाद्विभूत्यै मम ॥ ३ ॥

वाणी व्योमतरङ्गिणीव विबुधश्रेणीमनोहारिणी
वेणीवातुलपूर्णबोधकरुणासिन्धोस्सदैकाश्रयः ।
क्षोणीवाद्भुतराजयुक्तिशरणा यस्यानवद्यात्मनः
सोऽयं श्रीजयतीर्थतीर्थचरणो भूयाद्विभूत्यै मम ॥ ४ ॥

तत्त्वानां ग्रहणे श्रुतिस्मृतिवचो नेत्रं निशा मुक्तता
भाष्यं पार्वणमिन्दुबिम्बमुदधिस्तस्यास्पदं पूर्णधीः ।

सूक्तिर्यस्य शरद्विभातिं विलसत्सद्युक्तिहंसावलिः
सोऽयं श्रीजयतीर्थतीर्थचरणो भूयाद्विभूत्यै मम ॥ ५ ॥

जीवाभेदमताहिदष्टजसुजनव्रातार्तिविच्छेदन-
प्रौढा गारुडमन्त्रराजिरकृतश्रद्धैर्दुरापा सदा ।
जाता न्यायसुधामिषेण महतां मोदाय यस्याननात्
सोऽयं श्रीजयतीर्थतीर्थचरणो भूयाद्विभूत्यै मम ॥ ६ ॥

पूर्णप्रज्ञसमक्षमुक्षजननो जिष्णुर्वहन् भारतीं
तस्यैवादिगुरोर्मुखाद्यदपिबत्तद्भाप्यभावामृतम् ।
शेषावेशयुतो हिताय महतां वाचा ववर्षाद्य यः
सोऽयं श्रीजयतीर्थतीर्थचरणो भूयाद्विभूत्यै मम ॥ ७ ॥

श्रीमध्वेशपदाब्जमत्तमधुलिड् दोषाभ्रजञ्झानिलः
नानावादिकुतर्ककैरवरविः सत्तर्करत्नाकरः ।
यस्त्वक्षोभ्यकरामृताम्बुधिशशी सत्सेव्यभव्याकृतिः
सोऽयं श्रीजयतीर्थतीर्थचरणो भूयाद्विभूत्यै मम ॥ ८ ॥

एतद्वेङ्कटसूरिणा विरचितं टीकागुरोरष्टकं
भक्तानां शमदं मतिप्रचयदं मध्वेशकारुण्यदम् ।
यः प्रातः प्रयतः पठत्यनुदिनं सोऽभ्येति भूतिं परा-
मत्रामुत्र च नात्र चित्रकलना प्रीतिर्गुरोर्हीदृशी ॥ ९ ॥

॥ इति श्रीमज्जयतीर्थाष्टकम् ॥

—* श्री कृष्णार्पणमस्तु *—

॥ श्री गुरुभ्यो नमः ॥

—:*:—

—: श्रीमदभीष्टाष्टक प्रारम्भः :—

हरे मुरारे ऽच्युत दीनबन्धो रमेश लोकेश जगन्निवास ।
प्रसीद पादप्रणते मयि द्राक् दयानिधे त्वां शरणं गतोऽस्मि ॥१॥
पिता च माता च सखा च बन्धुः गृहं कलत्रं च सुतादिकं च ।
धर्मोऽर्थकामावमृतं च सर्वं त्वमेव विष्णो मम सर्वकाले ॥२॥
न दारचिन्ता नहि भोगचिन्ता न भाग्यचिन्ता न च पुत्रचिन्ता।
न गेहचिन्ता नहि देहचिन्ता तवैव चिन्ताऽस्ति हरे ममाद्य ॥३॥

धनं मनो वा स्वजनानुकूल्यं दिनेदिने हीयत एव कालात् ।
अतोऽर्थयेऽद्यैव हरेऽर्चनं ते कृपालवादेव सदाऽस्तु तन्मे ॥४॥
तवाच्युतोदारकथामृताब्धौ मनो विलीनं मम पुण्यपापे ।
यथा न गच्छेद्विषयाब्धिगम्ये तथा कुरुष्वाद्य हरे नमस्ते ॥५॥
हरौ चिदानन्दतनौ स्वबिम्बे विलग्नभावोऽन्यदतो न किंचित् ।
समीक्षमाणोऽचलदेहदण्डो यथा रमेऽहं नृहरे तथाऽस्तु ॥६॥
स्वबिम्बसंस्थं ह्यपुनर्बहिष्ठं प्रतीक्ष्य तं मां प्रकृतेर्गुणाद्याः ।
भवन्तु सर्वे शिथिला निराशा यदैव शून्यालयमत्कुणाद्याः ॥७॥
स्वकर्मनाशे गलिते च देहे स्वरूपभूतैर्निखिलेन्द्रियैश्च ।
कदा नु पूर्णात्मसुखानुभूतिश्चरामि मुक्तैस्सह विष्णुलोके ॥८॥

पठेदभीष्टाष्टकमच्युताग्रे नटन्निदं वेङ्कटसूरिसूक्तम् ।
अहर्निशं यस्स हरेः प्रसादाद्विमुक्तसङ्गः स्वपदं प्रयाति ॥९॥

—: इति श्रीवेङ्कटसूरिविरचित मभीष्टाष्टकं समाप्तम् :—

—* श्री कृष्णार्पणमस्तु *—



॥ श्रीमदभीष्टाष्टकं समाप्तम् ॥